श्रीरजन्यारुणेः ॥२॥ तत्प्रतापभयात्सूर्यो दिक्षु दोभूत्स्रुकुसः ॥ जेतुकामः कुचलयं पुष्करस्थानमास्तवान् ॥३॥ अपि
च ॥ रत्नाप्यश्चंद्रश्वरमाचलदुर्गइतीव यत्कुमकाली ॥ कांतंनिरीक्ष्य भानुंमकरवमुद्रांत्यजति तत्कुरस्पृशा ॥४॥ यद्वा ॥ चंद्राब्जयो
र्मिथो द्वेष इति मिथ्यान्यथा कथं ॥ चंद्रविहिकपदे लीनेत्तस्पश्रीः कमलंगता ॥५॥ इति तत्कुतार्कं चिन्मितमुरवः तमेव प्रदेशं
प्राप्तः ॥ यत्रसामन्दिरेक्षणा दृष्टा ॥ आगत्य च ॥ कमलच्चंदनंससगतिकसमीरसंस्पर्शवर्द्धितानंगव्यथः ॥ स्वगतं ॥ पश्चि-
मिकिमितिकीउत्सिमफपेर्दूज्वालवोपिनहिकिते ॥ हरहरविस्मत्योक्तं कतु लज्जासन्वितरकायाः ॥६॥ धिक्ते पल्लवरा
गं सोरम्यं भ्रमरइघ्रतांचापि ॥ पापे चंदनतिलके ज्वरभुतंगेन संवृतायस्मात् ॥७॥ तपस्याराधनं हित्वा मध्कना प्राप्तविक्रि
यः ॥ को वा नमदतामेति तन्नोदाहरणं मरुत् ॥८॥ इति चिंतयन्देवात्र चारखंडलतास्वगताः ॥ इड्राइव ॥ कनककलिकाम
हिताः दुर्जनाइव वहुलतालसच्छोभाः संगीतकमाइव भूभागाः ॥ इतउन्नरतो नास्तवकः स्तराकः लतामंडपश्च ॥
वहुचित्रको वृक्षपूगः क्रीडाशैलश्च ॥ विलसद्कुचितः पुष्पप्रकरः ॥ पक्षिनिकुरंबं च स्करवयति ॥ इतः पश्चिमतो वनि

ताजन इव चलदलकः सप्तपर्णः ॥ तव रक्षुरिव सोद्वेगः पूगवृक्षः ॥ इति वदतः मरालकस्य वचनमनाकर्ण्येव मया त्वमगया
२६ श्रांतेन स्थितं ॥ अत्र कोपि नेत्रानंदोभूत् ॥ तदधुनापि निधुवनलीलेय खंजरीटानां रंजयति लोचनलोभनीयामानसं कस्य
न चरणालक्तकरसमुद्रिताभूमिः ॥ इत्यालोचयन्नेव कस्मिंश्चिल्लतामंडपे निषसाद ॥ मरालकस्तु ॥ अयेकिमिदं निसर्गनिष्क
रोपि देवः मनागपि मदुक्तिं नालर्चयति ॥ न सस्नेहं पश्यति ॥ न सस्मितं भाषते ॥ नयनभूमिमनुमोदते ॥ नर्मंदमारुतमनुकंप
ते ॥ तदत्रागमकमयाः स्खलितं भवेत् ॥ भवतु नावत्संभाषयामि ॥ को गर्वः प्रभूपजीविनां ॥ किं शाठ्येन मित्रधर्मानुगतानां ॥ काव
मानग्रणनाधनिकाराधकानां ॥ इत्यालोच्य पुनः प्राह ॥ देव ॥ संमुग्धालिपरिष्कृताञ्जवदनं गरुत्फुल्लसद्हंसकं राजच्चं
द्रनखारुचित्रितिलकं पुन्नागभाग्यास्पदं ॥ रंभोरुश्रिस्रुमल्लिकाक्षगतिकं सख्यस्त्वयो व्यासितं रम्यं राजशिखामणे समदनं ॥
इत्युक्तिं एव तदभिमुखीभूय वयस्यमरालक क्वास्ते इति सस्पृहानंदस्मितं पृच्छति देवे श्रीनिवासे श्रीमदनं दृश्यते इति तच्छे २६
षं पपाठ ॥ तदाकर्ण्य सखे ॥ स्त्रीरत्नमास्ते पुरः ॥ १ ॥ इति न कथितं भवता ॥ तदधुना किं श्रीमदनेन श्रीमज्जीवनेन वा कुसुममिति

कथयन्नेव बाष्पनिरुद्धनयनयुगलः॥ ललाटाहितदक्षिणपाणितलः॥ मूर्छितइव सहि निपपात॥ अथ मरालको विज्ञातचे
तोविकारबीजः॥ अहो कथमेनां दशां प्रापितः कयाचन वा अतिधीरप्रकृतिरपि देवः॥ तत्स्त्रीरत्नं कुतो वा न भवेत्॥ अपि नाम
स्तानि गलयेत्ता तां तंतुजालेनाभ्रमुदलस्तंभं बध्नीयादपि पदच्चारेण पृषदश्वं॥ धन्याः खलु भगवतः कुसुमधन्वनः प्रभावपरि
पाटी॥ यद् बलाजनादपि परिभवमनुभवंति पुरुषपुंडरीकाः तदनेनाभयाकिंकृतेन भवितव्यं॥ सर्वथा प्रस्तावविधुर एवा
स्मिसंवृत्तः अतएव मृगयापराङ्मुखोन्यइव लक्षितो देवस्तत्कथमाश्वासयामि॥ यदि तन्मतमेवानुसरामि तर्हि स्वभावतो व्य
सनिनः मत्प्रोत्साहनं ज्वरितस्य जलसेकवद्विषमां दशां प्रापयेत्॥ वरूप लाभे लाभे तूभयलोकभाक्तता॥ यदि वा निषेधयामि
तर्हि सद्य एव प्रणयप्रसरभंगः सर्वथा न मोक्तव्यः धात्रे॥ येनायं निर्मितः स्नेहपाशः॥ येन बद्धः पुमान्नेशस्यगात्राणां चालनेपि
स्वकर्म इदं केनचित्॥ दीपे वा तैले वा पतति पतंगो विनश्यति क्षिप्रं॥ अतएव भणामि सखि स्नेहो बद्धो न किंचिदप्यूनः॥३॥ इ
ति भवतु तावदेनमन्यतो नयामीति संचिन्त्याह॥ देव धीरप्रकृते॥ इतः किंचिदविदूरत एव सुवर्णमुखरी तामनुसरस्व स्मर

शरजर्जरितमानसमाश्वासयतु देवः ॥ यतः ॥ उत्फुल्लकेसरावलिविलसत्कमलालिपुंडरीककुलं ॥ आस्यच्छक्ककर्दबतद्वन
२७ युगलं न कस्य मोदाय ॥ १ ॥ इति तदनु श्रीनिवासोपि ॥ वयस्य मरालक सार्यतुन समयदलदिंदीवरदामकोमलेन तत्कटाक्षेण
विद्धस्य मम हृदये व्रीडासज्जनता गांभीर्यधैर्यमन्यत्किंचिदपि यामहत्तार्य्यं जर्कन्नतिष्ठति ॥ तत्किमपि सूक्तमस्त्रं वामाक
थय ॥ न प्रभुरस्मि मनस इति कथयन् साभ्यसूयइव तूष्णींबभूव ॥ तदा मरालकोपि ॥ अये चराकेणानेन मदनपिशाचेन वि
रहव्यथागिरिशिखरसउलीमारोपितो देवः ॥ तथाहि ॥ न बुभ्राति रतिं तल्पे शिल्पे च न स्वरयंति वीणाः ॥ प्राणाश्च न स्पृह
यंति राज्याय भोज्याय च ॥ १ ॥ अपि च ॥ अंगीकरोति वा धैर्यं न माधुर्यं ॥ संकुचिता वाकुन शुक ॥ विस्मृतं चातुर्यं न कालर्यं ॥ ग
तास्फूर्तिर्निर्वार्त्तिः ॥ वर्द्धितं व्यसनं वहसनं क्षीणा रुचक् नमनो रुक् ॥ उपचिता वाधा न क्षुधा ॥ तदत्र दैवमेव शरणं मम मंदभा
ग्यस्य ॥ सत्यमाह भगवान्पुरमथनः ॥ रिंगत्तरंगचलदंबुजकोशनिर्यल्लिंजल्कगंधभरवासितवातपोताः ॥ कंदर्पबाण २७
गणभिन्नहृदः क्षतेम क्षोरस्पृशीतिम धन्या कलयंति हंतेति ॥ १ ॥ यतः ॥ पुंड्रेक्षुचापवरसंगतभृंगमौर्वीनिर्यन्मरंदविषरूष

तपुष्पवाणः॥ कामस्य सोथ सहते परिरंभलग्नकांताकुचाग्रहरिचंदनकर्दकदोषः॥ अस्त्वेतदेवं मदनद्वयमां मध्याह्नसमयोति
तरां बाधते॥ प्रायेण तृषितो कोपि सलिलं परतुमिच्छति॥ अन्यथा पुष्करस्थानं प्राक्रयाद्यमिकुतः॥१॥ तदिदानीं॥ निर्यन्मारंद
धारामिलद्दलिपटलीगीतमाद्यत्कुरंगं च्छायामायाभ्रनत्यष्टिरविकुलमसकृत् कोकिलालापहृद्यं॥ वेल्लन्मल्लीप्रसूनप्रसृम
रललितामोदसंवासिताशं नीउत्रीउद्दिजालिप्रसवभरनतं तं रसालं भजामि॥३॥ इति संचिंत्य॥ इतस्ततः संचारितचक्षुः
क्रामपि वनोद्देशे संचरंती बालसोलत्वोलं यां गनामासोच्य॥ पुन्नागगंउतलचुंबनलोलचेतो यत्निर्जहासिनितरां कनकाभिला
दूप षं॥ श्यामे भ्रमरेरराजि मनोहरेत्वमार्चंद्रतारमवनौजयजीवमकरंधे॥१॥ इत्थमाय दृदति तावदेव यदृच्छया कयाचन वनितया ते
नैव मार्गेण कापि गच्छंत्यासमाकर्ण्य आभुग्नकंठं॥ कोयमिह धन्यो मामाशिषा वर्द्धयति पृच्छामि तावदिति उपसर्प्प भद्रमुख कोभ
वान्महानुभाव इत्यज्ञातुमिच्छामीति तया सादरकृतांजलिपुटयोक्तः॥ साश्चर्यं॥ चपलाक्षि अस्य वाम्नतरोरावालाभरणीभ
वक्षणं॥ भ्रांतास्मि अहमपि कश्चित्पांथः॥ कासि त्वं॥ क्व यासि॥ किं ते पाणौ॥ इति तामभिधाय तयापि तत्कालरूदपरिचर्य

सालथा॥स्त्विति जल्पंत्या॥छाया न्यग्रोधसालेपरिमललहरी चंदने किंशुके स्वसोष्मी शोभा फले श्रीरपि च बकुले कदलीवृक्षवारीफल
२८ ष्पा॥किं तैरेवैकसर्वं परपरिकलनचणैः सर्वसंपत्समृद्धक्षोणीमंदारचूतद्रुमतव गरिमा मद्गिरामप्यभूमिः॥१॥इति रसाल
द्रुमस्तवनव्याजादस्मानंतस्तापयास्सहनत्रैचक्षणमतिष्ठत्॥इतो देवोपि॥अहो किमिति वक्तव्यं॥यदियं कल्याणी मत्प्रेमभ
रं जानातीति त्रिभुवनचातुर्यनिधानस्थानदोषारोपः॥ज्ञात्वापि तूष्णीं तिष्ठतीति नतादृशो जीवः॥ज्ञात्वा ज्ञात्वा वा किम
तिप्रकृतविरुद्धालापः॥अथ श्वो वा सफलो भवेन्मनोरथ इति तावन्निःसरंति प्राणाः॥कंदर्पहतकस्य तदैव स्वर्गनि
वेदितमित्यधीरतालाघवं॥कस्मैचिन्निवेद्य स्करवीमवामीति चरणलग्नकंटकचालनरीतिः॥अलमेतदनुरागेणेत्य
रसिकता॥दैवमेव शरणमिति साधारणसरणिः॥सप्रयत्नेन भवितव्यमिति पिष्टपेषणविधिः॥मदनाहीनेव शिक्षा
गामीत्यकांडतांडवविधिः॥एतद्भुमयत्नापि समग्रमिति चातुर्याभासः॥रे हंस जामी खबुधचरणानुचरणप्रसंगः॥ २८
॥किंच॥निद्रा न याति नयनं व्याधत्रस्ता मृगीव कांतारं॥अचला न भित्तिरत्नैर्नौकातुल्येव वायुना जलधौ॥२॥रागस्तीव्रं

प्रसरति स्फुरणे गुणिनां यथा लोके ॥ आवेगः श्रीप्रतरः प्रतिभाक्रमवत्कवींद्राणां ॥ ३ ॥ इत्यात्मन्येव आलोचयन्मदन
वेदनातिरस्कृतेतरवेदनः मनःकस्थितां तां कांतां स्वसमीपमागतामिवाकलयन् प्रसारितबाहुयुगलः आलिंगितुमिष्
न् तत्र किमप्यदृष्ट्वा अथैवं चिंतितोऽस्मि मदनहतकेन यौवनेन दैवेन वा येन वा केन वा अथवा स्मृतेरेवापराधः यथानेयं वृत्ति
तेति ज्ञापितं ॥ तथा हि ॥ ईषद्धासतरंगिताधरपुटोन्मीलन्निषेधाक्षरश्रेणीः सूचितरागसागरमिलल्लज्जानदीप्रक्रमां ॥ क्रो
डे तां परिधाय चुंबितुमुपक्रांते अथ कांतामणिं मय्यानंदयुते विघातमकरोत्क्वापि स्मृतिः पामरी ॥ ३ ॥ इति चिंतयन्स्थितः ॥
तिष्ठलेत्तत् ॥ इतः सापि स्वयं तां तं वक्तुमारभत ॥ ज्ञातएव किल नस्तमितामितमतिसमस्तलोकश्लाघितसभास्तारश्री
रक्तनिखिलवस्तुविस्तारस्तारश्च तरुहरिणकुलोत्तरः ॥ उत्तरश्च गुरुगांगेयकर्णभूषणहारिनरोपचितकीर्तिसंख्यः
॥ संख्यावानिव सुरसभावमतिदक्षः ॥ दक्षिणेष्वक्षीणलक्ष्मिसंमदस्थायी द्रविडो नाम देशः ॥ यत्र च ॥ निरंतराक्षसंमतानं
दितजगतां ॥ गवां ब्राह्मणानां च परिपालनेनामृतजीवनानां देयानां द्विजानां चाशिषां गोत्रानंदकोरंण्युगदः ॥ स्फुरे

नजीवति लोकः ॥ तथाहि ॥ तिमिरबाधा कृष्णपक्षे ॥ पुंडरीकोन्मत्तिः सरसि ॥ पांडुकथाश्रवणं महाभारते ॥ रोहिणीसंबंध
२९ श्चंद्रमस ॥ कुसुमपतनमाचालेषु ॥ उष्णवायुप्रसरो ग्रीष्मे ॥ क्षयः संवत्सरेषु ॥ किंबहुना ॥ मणिः सरुक्नदीवर्गः सदा
बकुलगद्गदः ॥ सामयश्रीरथाभाति दैत्यदानवमंडले ॥ ३ ॥ यत्र च मालिन्यान्विताः आरामाः न वारामाः ॥ राजद्वेषिणः कोकाः
न लोकाः ॥ किंच ॥ निषादा द्विजातिभेदुष्यकुलाः ॥ चरणप्रहारभेदिता अशोका इव वीरलोकाः ॥ तत्तादृशस्योपवर्णितस्य म
ध्ये ॥ अस्ति पुरंदरपुरःसरनिलिंपजनतास्तुतसंपत्प्रपंचमणिमंचायमाननाकलोकप्रतिबिंबायितशोभाभवनं वनमि
व कमलावासस्थानं ॥ आस्थानं सर्वसंपदां ॥ पद्मवन्त्रिशांतरमणीयं ॥ लसत्स्फुरराजन्यमपि अदृष्टस्करराजन्यं नारायण
पुरं नाम नगरं ॥ यत्र च सूर्यसोमसंततिपठिताः वाराइव वीराः ॥ वातगतिबंधवः कुरंगा इव तुरंगाः ॥ श्रीनिवासयो
ग्यानि वनानीव भवनानि ॥ किंचातिप्रपंचेन ॥ प्रजारंजनं वीक्ष्य राज्ञोस्य देशे पुरी यन्नगानां किलात्रागलेति नच्चित्रं प्रि २९
याभोगिनां सा यतस्तद्भुजंगाः पुराणप्रसिद्धाः बभूवुः ॥ तत्र च अस्ति प्रशस्तप्रतापज्वालावलीकवलितनिखिल

हितजन्मनिर्जितस्तोजन्मवर्जितराजन्यवनिताजनमयननीरनीरजमालाविश्रंखलगलदश्रुधारानदीमातृकाया
मानभुवनश्लाघितयशःप्रसरःसरइवसकलनायकगुणमणिः॥मणिरिवसन्मालामध्यस्थितः॥राजालसत्याकाश
राजोनाम॥यश्चयुधिष्ठिरइवानंतविजयघोषमुखरितदिङ्मुखः॥अर्जुनइवदेवदत्तसंपन्तिरस्कृतसुरासुरःज
रासंधइवभीमरूढविशारदः॥यस्मिन्रक्षतिक्षितिं॥द्वंद्वंयुग्ममेव॥विग्रहोदेहएव॥कलिर्कगमेव॥किंपल्लवेन
प्रलंबताहलिहृषिण्यस्कंरेपिसरेपिच॥पयोधरयुगेनैवरमणीनांकदाचन॥३॥शंकरःपुरुषेषुत्र्यःस्त्री॥षुर्चउनगा
त्मजा॥कुमारेषुमहासेनस्तारकानंदघातुकः॥३॥सगृहराजहंसमंडलघनाश्रयःस्वर्ग्गानोद्भवनिदानं॥कल्या
णशद्गुणयुक्राजाकाशाभिधोजयति॥३॥अथैकदाचिद्वृपन्तपालःएकभार्यासक्तोपिप्रजारहितः॥ततन
यापेक्ष्यपितनयापेक्षी॥मदनमूर्तिमिवकमलोदराज्ञातांकांचनकन्यकामलभत॥ततश्चगतेषुकेषुचिद्दिवसे
षु॥भूर्गगिपंजनयंत्यनुदिनमवनीपतेर्मुदेभवति॥इतिसर्वेषुकुमारंप्रासःततराधरादेवी॥३॥चित्रमिदंश्र-

णु॥ तोषयामास नृपतिं तत्कलत्रं धरादेव्यं॥ तत्रैव गोत्रमासाद्य महिषीभूय चापरा॥ १॥ अस्त्वेतदेतयोः॥ भूयसी वेला संजा
२० ता॥ तत्रैवसे वतः कथयाभिकथनीयदोषं॥ अन्यदा तु॥ राजपत्नी धरादेवी प्रथमोच्छ्वसितकुसुमकलिकयेव मल्लीलतांश
रत्कालकलयेव राकानिशानिलिंपतरंगिण्येव हरचंद्ररेखा॥ नववनयोन्मेषशालिबुध्येव कुविकृतिं॥ विनयसंपदेव गवेषा॥
अभिनवयौवनोद्भूत्या राजमाना॥ तान यावल्लोक्य॥ इयं किलाद्य याह योग्या जाता॥ अस्यामानसकासार इव तुष्टीकृतसक
लसरोजातं॥ गणिकासमूहमिव रक्ताशोकनवपल्लवोच्छ्वसितं॥ अनिरुद्धमिव चित्रलेखालंकृतं॥ पाणिं गृहीतुं कः पुमान्
कृतसुकृतराशिर्वर्तत इति न जाने॥ न केवलं मनुष्येषु किंतु देवेष्वपि॥ यतः॥ इंद्रो भूभृज्जातानासः॥ सूर्यस्तु हंसः॥ चंद्र
स्त्वेकहस्तश्च वृणः॥ इत्यालोच्य॥ उत्तुंगसौधगतमणिमंचिकायामुपविष्टं॥ प्रसन्नचंद्रमंडलं॥ अवेक्ष्य॥ दिष्टेन दत्ता साशो
भाचंद्रं प्राप्य लसस्थलं॥ इत्युक्ता किंचिद्धसंतं आकाशभूपमासाद्य प्राप्तावसरा भणद्देवी॥ पित्रा दत्ता यथा कन्या प्राप्येव सद २०
शं पतिमिति॥ ततश्च देवोपि किंचिन्नरलितमस्तकं प्राह॥ देवि सत्यमेतत्॥ मयापि ज्ञातं पुरैव॥ किंतु सरस्वत्या रवप्रधा

लकरायाः स्तवुनंदिन्याः सदृशो वरः क इति चिंतयन्नपि न निश्चयं प्राप्तोऽभिदेवेष्वपि किं पुनर्मनुष्येषु ॥ यतः ॥ दोषः पूषा
चसदारदः ॥ इंद्रश्च समुद्रश्च नीरसानंदः ॥ अस्त्येन तत्तरणिः ॥ स्वशशोरपि कन्या मा भूत् पश्य पश्य ॥ मुग्धो भूते ज्ञाभूते शशिरो
मण्योस्तकोचरः ॥ अश्वाप्पोदक्षस्याधिकन्या तात तांदुःखजीविन इति ॥ अथ सा भर्तृणदितमाकर्ण्य हंहोऽकिमुच्यते ॥ दक्षः पु
ण्यवतां श्रेष्ठो नो चेत्तस्य कथं भवेत् ॥ एको राजा द्वितीयस्तु जामाता राजशेखरः ॥ ३ ॥ किंच ॥ दत्वा पांचालिकामात्रं नरम्मा
श्रायपार्वतः ॥ धर्मगुणं च गुजयः मिपि किं नापभाग्यतः ॥ ४ ॥ अतः सप्रयत्नेन पुरुषेण भाग्यं दैवं तत्सह कारि भवतीति
प्रज्ञापयतां वारः ॥ अतः परं आर्यपुत्रः प्रमाणमित्युक्त्वा जोषमासीत् ॥ विरतवचनायां तस्यां देव्यां स्वयंवरमहोत्सवस्य
राज्ञा यतमानेन सर्वेऽपि भूतलभाजो राजपुत्राः आकारिता आजग्मुः ॥ तत्र केचन शेषा इव लसन्मणिमालालंकृताः कुं
उलिनो वारुणीप्रमदाः ॥ कंचुकिनो रसातलं भूषयंतो भूभृतः ॥ केचन ॥ कैलासपतय इव सार्याः वृषप्रियाः सकुमाराः
अहीनमालाभरणाः राजशेखराः ॥ केचन ॥ तुहिनगिरय इव ॥ अचलसंबंधयोग्याः ॥ रूपेण मेनकामपि मोहयंतः

अनेककोशिरवरश्रीविराजिता:॥उत्सृष्टका:॥सपक्षनंदना:धराश्चक्रवर्तिनश्च॥केचित्॥दिग्गजाइव॥भद्रासनशो
२१ भावहा:॥शृंगारसुंदरा:॥सार्वभौमाधिकसंपदश्च॥अथतान्राजपुत्रान्देवस्तांसभामनयत्॥यास्वकु॥महाराजेरि
वप्रकृतिसुंदरवर्णे:॥इक्षुचेरिवगोत्रामये:॥लोलुपैरिवतीव्रकरणे:॥अनल्पशिल्पिवर्गै:॥स्वर्गविस्मापितविश्वकर्मा
नसै:निर्मिता॥तस्यांकिल॥संवर्तकालकलयामिव॥अंबरमणिगणभूषितायां॥वरुणभार्यायामिव॥अनंतरत्नछायो
द्भासितपुत्रिकादर्शनहर्षितजननिचित्रायांमयूरैरिवभास्करचंद्रकांतै:॥गरुडैरिवगरित्वलस्यतंगमणिभि:॥कपिभिरि
वस्कनारेलै:॥प्रभातकालैरिवपद्मरागोज्वलै:॥इंद्रैरिवसवज्रै:॥वसंतवृक्षैरिवसप्रवालै:॥मणिजालकै:॥अलंकृता
स्तंभो यांसोपानेष्विवदांतेषु॥दानवेष्विवहिरण्यराजितेषु॥वनसंनिवेशेष्विवबहुलतास्केषु॥क्षुद्रग्रामेष्विवदुर्वर्णप्रचुरेषु॥
शरन्निशाकाशेष्विवचंद्रताराभिरामेषु॥द्रुपदराजेष्विवअनेकवरपादसमर्पितपांचालिकेषुआसनेषुउपविष्टेराज ३३
पुत्रकदंबे॥नटनर्तितशालभंजिकापुंजेषु॥तद्दर्शनाश्चर्यनिश्चलजनेषुच॥विभाविते जउच्चैतनरपिपर्यासे॥चउ-

न्क्रियत्नुभीयमाने॥आगारचित्रप्रतिमाचामरग्राहिवनिताजनतापिवेके॥द्विपक्षभुपर्सके तदकुम्रसारमुक्तीभव
स्सभाजने॥सभाजने॥तत्रतत्रपर्यट्टितितांबूलकुंकुमचंदनपटवासादिमंगलद्रव्यदायिजने॥राजाज्ञयाआकारिता
भर्तृदारिकाशचीवनिर्जरनारीकदंबपरिवृता॥मुग्धमकरध्वनेपथ्या॥रंगधरांसातुंगकुचश्रीः॥आपंचमूर्ध्वभूपतिपं
क्तिं॥१॥ततस्तांचंपकवल्लीनामसखीप्राह॥भर्तृदारिके॥पश्य॥एतेराजपुत्राःत्वयिसर्वसक्तचेतसः॥तैदेनेषुन्य
तममंगीकुरु॥कथयाम्येतेषांनामरूपक्रियागुणान्॥तथाहि॥एषकिलानेककांउचक्रकीर्तिसंपत्शोभमानवाहि
नीभरमर्जितविपक्षभूभृत्कदंबः॥महासत्वप्रचाररमणीयः॥दर्शितानेकनिकटकांतारागोचरभमाणोत्कलिको
यमगाधहृदयः॥सिंधुराजोराजनंदनः॥एषकिलसर्वतोमुखानिरूढसंचारसार्थकितानिमिषचूडामणिविभवोनि
जविलासस्तोकितास्ररोगणमहितमहितउडुपतरणिवंशावलंबिजनाकलितरसातुभवःराघवसदृशःमत्स्यरा
जःकंदर्पकेतुर्नाम॥२॥एषकिलअनेकभूमिकाग्रहणविधानुरूपविविधशिक्षाचलजागरूकपरिवारपरिवृतः

नृत्यत्समराधिकरणस्थानभूषायमाणः॥ल्लसरंगहारः॥रागशाली॥आनर्तदेशाधिपतिः॥कंलकंठो नाम इति॥३॥शो
२२ र्यशालिनि तदा प्रियसख्या वर्णिते सदसि राजकदंबे॥स्तोत्रपाठरसिकापरंमो मागधान्यपसृता बुद्धमेने॥२५॥तदनु
तेषां हर्षेण सह॥आरूष्य दृष्टिं अंतःपुरं गतायां भर्तृदारिकायां॥प्रतिकलजृंभमाणयौवनभरलोचनलोभनीयाव
स्थायां॥मदादौ परिजने॥कर्त्तव्यमूढे॥देवे आकाशभूपे पिंचिंताव्याकुलचेतसि॥यथागतं गतवति मिलित राजवर्गे
॥अतिक्रांते कस्मिंश्चित्काले॥कदाचित्॥परिवादिन्या विपंच्या॥अपरिवादिन्या चर्यया च॥१॥चलक्षेण कांतिक
लापेन॥नवलक्षेण गुणवृंदेन रक्तः॥२॥कोपि मनुरागत्य राज्ञा पूजितः कंचन युवानं अवर्णयत्॥पश्चात्ता
तं॥समुन्निनीरद इति॥परंस राजपुत्रः कइति न जाने॥तस्मिन्नु नो यथाभिमतं याते॥भर्तृदारिका तु॥स्फुरत
स्मारसर्वस्वेन हृणित राजकुमारे॥अनुरक्तहृदया आसीत्॥अन्यदा॥वसंतकाले उपचित्तमनोभवविकृतिः॥ए २२
कत्रस्थितिमसहमाना॥श्रवणमात्रगोचरे॥संकल्पनिर्मित दर्शनस्फुरदे॥तस्मिन् प्राणप्रिये॥कृतांतिप्रणया॥

विरहविनोदनाय स्वर्णमुखरीतीरं उपससर्प सर्पवेणी ॥ तत्र कंचन मृगयासक्तं किरातराजमपश्यत् ॥ शृणु सखे-
अद्भुतं वृत्तमेतत् ॥ स किरातराजः स एव राजपुत्रः ॥ यस्तु नारदोक्तगुणकर्मरूपकलापः सोपि च तां ॥ अथैतस्मिन्नु
नं अनुरूपं पद्येन तस्मै रूपे द्विधा ताततुर्हि सफलस्तस्य मनोहरणरूपनिर्माणप्रयासः ॥ इति मंदमंदं जल्पति सखीज
ने ॥ कालातिपातभिया प्रथमं चलितायां भर्तृदारिकायां ॥ सोपि किरातभूभृत् क्षणं तत्रैव लतामंडपे स्थित्वा स्वाभिम
तदेशमगमत् ॥ ततः प्रभृति ॥ गजेंद्रगंडमंडलं गलन्मदासारसार्द्रीसहितमिलिंदांगनेव नीरजातस्पृहा ॥ १ ॥
देवेंद्रचित्तवृत्तिरिव न भोजनस्संजातप्रीतिः ॥ २ ॥ कुकविवाग्विलास इव मृदुलां शय्यां नांगीकरोति ॥ ३ ॥ दुष्टभूप
श्रुतिरिवालिमंजुलशब्दान्न सहते ॥ ४ ॥ एवं स्थिते ॥ मंदमारुतजातविक्रमभरे चक्रे च शोकाकुले निवर्तितस्मनो
गणे ॥ भिविलसत्सुहृद्द्यापलाज्ञाव्रजे ॥ मित्रेऽस्मिन् कुमुदेक्षिलीमुखचये रामायणप्रक्रियां सम्यग्दर्शयति ॥ च मित्र
शत्रुभेतारापतिः केवलं ॥ ५ ॥ ततश्च ॥ गगनगंगापुंडरीकगलन्मारंदधारासार इव हरिद्योधानविहरदेश

तपगंउमंडलकपणक्षतहरिचंदनतरुचूर्णइवमिश्रीभवन्नारदे तृणीकृतपारदे ॥ जगद्धवलीकरणविशारदे ॥ निदित
२२ जारे ॥ त्रासितजारे ॥ शुभ्रीकृतनिखिल--नारे ॥ सचकितपरकीयाभिसारे ॥ संधितकुपितवनितासंसारे ॥ विरहिजनदू
रे ॥ कृतसकलजीवलोकानंदविस्तारे ॥ स्तोकितचकोरकक्षुधि ॥ चक्रवाककामकेलीरुधि ॥ वर्धितस्वाधीनपतिकाकाम
युधि ॥ कुमुदभिदि ॥ घर्मनुदि ॥ उन्निद्रशंबरशिरश्छिदि ॥ पथिकहृद्रुधि ॥ वर्द्धितरोगेविकचाविकचभावानुमीयमानेंदीवर
पुंडरीकविभागे ॥ पंचमस्वरविज्ञातपिकविवेके ॥ पारावारानंदपरिपाके ॥ चुलुकिततमसि ॥ चालितयुवमनसि ॥ स्फू
र्जच्चंद्रमसि ॥ प्रवृद्धकोकिलागीते ॥ वक्रीभवन्मदवाते ॥ मुकुलितवारिजाते ॥ संभोगगर्भगारानुकूलस्फारपारिजाते
॥ जाते विमलविमलचंद्रिकाप्रसारे ॥ उदितभूयिष्ठं ॥ पूरितसंकल्पयुवजनताभीष्टं ॥ भूषितपुरुहूतकाष्ठं ॥ संध्यास
मयतापसलोकविस्मृतस्फटिकमणिमालाभ्रमदपरिमलोभनिश्चलनीराजनीलीनचंचरीककुलालंकृतस्कव २२
र्णमकरवरीकेरयं ॥ द्रवीभवन्निजशिलाजालदुर्लंघ्यकुल्यारचनाविनिघ्नितनवाभिसारिकामनोरथपरंपरारंभं ॥

अत्यच्छमाकंदतरुशिखरगतकोकांगनापलदश्रुबिंदुसंदोहाः कालयषागमभ्रमत्तोषितपोतघातकचक्रवालं॥ चंद्र
मालोक्य॥ गोभिः परिष्कृतं भाति स श्रीकुंचावलमंडलं॥ इतिमदुक्तिमाकर्ण्य किंचिद्दर्संत्याः॥ नो चेन्नत्र कुतस्तिष्ठेत्सारंगः
प्रणयाकुलः॥२७॥ इति चंद्रस्याश्वंपकवल्याः वचनं अनाकर्ण्येव॥ विरहभारकृशांगी मां प्रत्युवाद॥ न्वषसःता॥ हला
पश्य॥ चंद्रोपंभ्रमसंगतेन विधिनाविह्मोःपदे स्थापितः पूर्णत्वं गमितः स लक्षणइणिस्थाप्याप्यपिसंयोजितः॥ च
क्राल्हादकरत्वमेति कमलानंदं विधत्ते यथा स्नेहं वा किमसौ त्यजत्यविमधोःपी तांशुको वा भवेत्॥ २८॥ इति॥ अ
थक्षणामेव ध्यात्वापार्श्वस्थिताया मदनकलिकायाः पाणिना पाणिमवलंब्य सखि मदनकलिके॥ चंद्रोयं पद्मिनीहृ
षीपुंडरीकविरोधकृत्॥ तस्य राकापतिर्वंचराजत्वं चेति विस्मयः॥२९॥ इति सत्वरं प्रत्येवलीलाकमलदीर्घिकात
टंउपाजगाम॥ तत्र॥ निश्रीकाणि कमलानि आलोक्य॥ कोपतरलिताक्षी भ्रुकुटीमावध्य चंद्रमाह॥ धात्रांतधिया ता
र्थितं सुरगजाधीशेन हस्ते धृतं क्षेत्रेषु प्रथितं प्रियव्रतकृजाते नसंरक्षितं॥ शुभ्रांशो जगतां सुजीवनमये निंद्य

थेतादृशं हं हो पुष्करमाश्रयं निजमपि ज्ञातोऽस्ति जाऽमीभयान् ॥ ४० ॥ तदस्तु किमस्माकं जगच्चिंतया ॥ हं हो कलानिधि
२४ रयं बुधनंदनोयं सर्वज्ञमौलिमणिरित्यवदंस्तदैव ॥ दोषाकरोयमिति कस्य पुरो मयोक्तं मत्पीडने न हि निशानमिहास्ति
किंचित् ॥ ४१ ॥ अथवा किं प्रार्थनया ॥ जीववधूग्रहणकलाप्रवीणता ते त्रिलोकविदितैव ॥ संपीड्य मामपि वधूजीवग्र
हणप्रवीणतां याहि ॥ ४२ ॥ इति मदनकलिकायां ॥ अहो आश्चर्यं ॥ यदि यमविज्ञातरतिस्तु त्वा पितस्वपुतो दर्शनादेवै
वं ताम्यति ॥ निंदति च चंद्रं ॥ भवत्वेवं ॥ भणामि तावत् ॥ इत्यालीभ्याह ॥ भर्तृदारिके ॥ दिवा सूर्यकृतस्य परिग्रहकुमु
दिनीपीडनासहिष्णुतया निशि तत्परिग्रहकमलिनीं बाधते ॥ तद्धूधनपि कारणमस्ति ॥ तदपि शृणु ॥ अर्द्धश्रवण
एव तव मास्तु कोपः ॥ तथाहि ॥ तव कमलसदृशं नेत्रद्वयं ॥ अब्जसदृशं करं ॥ जलजरूपः कुचः ॥ तामरसमनोज्ञो
वर्णः सारसानुकारिजघनं ॥ पुष्करयं धुर्मध्यदेशः ॥ पुंडरीकसमानं गमनं ॥ पद्मोल्लासितं सौंदर्यं ॥ किं बहुना ॥ प ३४
द्मिन्येव भवतीखलु ॥ अतो ब्रवीम्पर्यं नचिषमचतरि ॥ किंतु समचतरि ॥ कोऽत्र दोषः सुधाकरस्येति ॥ एवं कथयेत्यां प्रि

यसंख्यांशून्यहृदयंविहस्यतामेवलक्षीकृत्यप्राह॥भर्तृदारिका॥सखिमदनकलिकेपूज्यमानमभिहितंत्वयायत्समवर्ती
चंद्रइति॥यतः॥कृशानुभावंक्षीणोपिपूर्णोपिचनमुंचति॥अतःसखित्वयाचंद्रःसमवर्तीतिगीयते॥५३॥सखिइद
मेकंविस्मृतंत्वयायेनमहाननुपयोगस्तवेतिस्मार्यते॥नधर्माधर्मयोस्तुल्यःश्रीपुत्रःपुष्पसायकः॥समवर्तीकुतःसोपिन
भवेन्नीरजानने॥५४॥सखिज्ञातमिदानीं॥यच्चंद्रादयःसर्वेप्येकमत्येनचलंति॥इतिनयुक्तमेव॥यत्सर्वेपिशनिस्वभावा
एव॥तथाहि॥छायानंदनश्चंद्रःवायकर्मैदः॥वसंतस्तुजातितःकालः॥मदनस्तुगुणतःकालः॥कोकिलागणस्तुवर्ण
तःकालः॥अस्तुचैतत्परमिदमेकमेवविस्मयकरंचेतसः॥यत्वममंदगुणापितेष्वेवमिलितेतितत्तुशौर्यंजनोधन्यश्चे
ति॥तदनंतरं॥अस्मच्चंपकवल्लीमाकोपायभर्तृदारिकां॥दूनेयंदुरात्मनाकुसुमधन्वनासुधाकरेणच॥तदलमेतादृशव
चनोपन्यासेनेति॥मदनकलिकांनिर्भर्त्स्याचंद्रराजपुत्रीभर्तृदारिकेकिमितिविषीदसि॥एतेषामुपद्रवापनोदायअस्ति
कश्चित्सुलभएवोपायः॥तच्छृणुकदाचिद्धनरमायाःप्रथमर्तुसवसमये॥कस्मिंश्चित्लतामंडपेमिलिताःसर्वेसमा

स्मरः॥तदा त्वग्रपूजार्हः क इति प्रास्तायां विचिकित्सायां॥ कलावत्तया स्वयं चंद्रः॥ मरुकुलविश्रमाऽप्य इति वसंत वायुस्त्वा
३५ त्मानं बहु मेने॥ तदा तु तयोर्विवादमाकर्ण्य॥ भूपे स्वयं एवं मदने एकः कलहकीर्तियोमदः॥ कस्मोयं कलकंठः प्रथमं पू
जनीय इति वदति स स्वमान्नापयति महाराजः॥ यस्तु राजसूयज्ञ एवं निर्णयो जातः॥ अग्रपूजार्हः कुसुम इति वसंतेन भ
णितं॥ चंचरीकैरनुमोदितं॥ अशोकेनांगीकृतं॥ रसालेन श्लाघितं॥ ततः प्रभृति चंद्रादयः परस्परं साभ्यसूया इव तिष्ठं
ति॥ इति श्रुतं मया तदद्य भेदोपाये नैव देवाज्ञा ततस्तेषामंतः कलहोद्दीकरणीय इति तच्छ्रुत्वा॥ चमत्कृतः स्मरशरदृढ
प्रहारवेपमानहृदयापि च सत्वरांचलेन नृसिंहपुरीमिव संवहन्तीं॥ प्रभातवेला मिथ्याकुलकुलतारां लोचनयुगलीमुन्मुच्य॥
सा धार्ष्ट्येण वादधुरीणे साधकंधरीणकाव्यनिर्माणकलाचतुरे साधु भणितमिति मुहुर्मुहुरभिनंदनीया अभिनंद्य गद्गदमेव व
संतादीन् मदनं च नैवं कथयेत्याह॥ तथाहि॥ चंद्रः कांतोऽपि रोहिण्या वृषभोऽननुगो भयात्॥ वसंत रेकरभि रप्यथ किं तत्र ३५
तैरतिः॥५५॥ मातलहं तु स्तनयो मदन स्त्वं तस्य मातुलश्चंद्र॥ माप्नित्रयसहेतुगुणाः कार्येन हि किं भवंति तारे शा॥५६॥ कुद्ध

कूर्नेचणोयं पिकनिकरोहिंच पोषयति वायुः॥ तद्दूतया द्रुयकृत्स्वं सोमकि मिच्युये ततयोर्मिलसि॥५७॥ सर्वलोकजननीति
विश्रुतां मांदहृदयविरतं स्वरैः करैः॥ आसमभूरसि निवारयाशु नं मीनकेतनकुमुद्वतीस्फरवं॥५८॥ अपसरन्चंद्रा दूरं कथयामि
हितं समीरगिलसि त्वां॥ एषभुजंगश्चंद्रोमिथ्याचे स्पष्टभोस्तारां॥५९॥ इतिउक्काच॥ हंजे शृंगारमंजरि॥ इत एहीति मां मा हूय॥ म
लकं धाहि तैकथाहु॥ इतस्ततो हेमलतयचलंती प्राह॥ दुरुखेदः प्रेमा कश्चिदपि पदार्थे विरचितः स वाय लाभूमिः प्रियसखि विधातर्यसु
खे॥ शररुः कामो यंशकलवति मर्माणि ति लशोनयां स्ये ते प्राणाः कथमपि दुराशाभिगलिताः॥६०॥ अयि शृंगारमंजरि॥ एते मद
नादयो न गुणस्साध्याः किंतु दंडयाएव॥ मदनलक्ष्मीकृत्य॥ रे मनोजकुलदीपक रत्नं प्रापितोसि न चिरेण विधात्रा॥ यसितु सत्त्वजनिति
तयेषामाश्रितोसि वनिताय धन्येषां॥६१॥ इत्यथाहमन्चितयं॥ अये मदनहतकोषमतितरां पीडयति भर्तृदारिकां॥ तद्दूलसर्वस्व
मर्यस्फधांशुः॥ तदनेनोपायेन भर्तृदारिकाकोपयित्वा शिक्षणीयः यथा अयं स्वां प्रकृतिं भजिष्यति॥ इति निश्चित्यावद॥ भर्तृदारिके
अहं कथयामि चंद्रवृत्तांतं॥ तथाहि॥ एष किल द्विजराजः॥ परिकल्पितमध्यागमः॥ अतनुहृताज्ञानेन सदूरं चक्रसंताप्याने कु

स्कमनः कदंबस्कृतोपनतस्य तपस्यानंतरं भाविप्रसादस्य भगवतो माधवस्य प्रेरणया कलितपरमामोदेन ॥ मंदानुकूलेन वा
२९ युनानुगृहीतः स वंशरुद्रयन्नेचरकांचरो बुधनंदनो भृगकन्निकापरिग्रहो योगिजनो ऽत्रासको वियोगदूनं जनमेनं स्वकरेण संता
प्योपदिशंतिपरपुरुषं भजेति ॥ तदत्र किंचित्तविक्षेपणे ति ॥ अथसावेलातीतकोपा ॥ आः दुराशापरपुरुषं भजेतिउपदिशतिकि ल
तफलं सघृणयानुभवतु चंद्रहतकः ॥ न त्संर्वं धान्मदनादयोपि ॥ इत्युक्त्वा विरहाकुलाभ्यां लोचनाभ्यां गलताश्रुजलेन क्षणाद्
जल्लिमापूर्य ॥ कंदर्पादीन् कटाक्षीकृत्य ॥ वार्यमाणापि सखी कदंबेनैव माह ॥ तथाहि ॥ यदि जन्मप्रभृति भगवतो नारदो न्नरो गुण
कर्मरूपा सकृत्त्वता मंउपेलज्जामंथरतारमालोकिता न त्वपर यूनोऽन्यस्मिन्पुरुषे यद्यहमनुरक्तास फलीभवतु मे सरस्वती
॥ हरे या च तनुत्वं आशुगचयः पंचत्वमेतु क्षयं सामंतः शिशिरांशु कोप असमनो भावव पुष्पाकरः ॥ मां यं यातु मरुत्सकृत्त्ववर
तिं गच्छतु सर्वं जगन्मापापान्मदनाहमस्मिन्निरते कस्मिन्न सा पापिनी ॥ ५२ ॥ इत्यभिधाय किंचिदालोक्य सर्वमपि सखीगणमभण २९
त् ॥ अपि सख्यो यये नामापदं विस्तीर्य जीवामि तर्हि वरमेव ॥ अन्यथा यद्यवतरति देवा घृष्य लोचनपथं सशबरकवा तत दैवं च

क्षमः॥यदेशासंभवात्तन्न हि तत्तद्भागहेतुकं किंतु॥गुरुजनलज्जामूलकमिति जानन्नमणकं च मयि करुणा॥५२॥इतिकथयं
त्येव बाष्पाकुललोचने वयस्याकदंबके॥विहाय प्रमदवनं प्रमदाजनं च मय्यप्प्रसादा प्रासादमारुह्य विहाय पर्यंकं पर्यंकस्थापि
त वामकूर्परकरकमलांचितवदना दक्षिणदक्कोणेन किमपि किमपि पश्यन्ती कनिष्ठिकानखशिखया बाष्पसलिलं दिशि दिशि कि
रंती क्षणं क्षणं परिचर्यापरायेण परिजने शून्यतरयाचितवृत्त्या बाहुमणुलयेषितजानुहृदयस्थापितमौलिः क्षणदीनदीनां दृशं पार्श्व
स्थितसखीवर्गे धीरं धीरं संचारयंती तस्थौ॥अत्रांतरे॥कथंकथमपि ज्ञाततद्वार्ता देवी धराकन्यका प्रासादं स्वयं लक्ष्मणिन्या सं
आगत्य॥किमिदं किमिदमिति पप्रच्छ सखीवर्गं॥तदनु॥वेद्यैर्ज्वरोऽयमिति दृष्टिरिति स्म धात्र्यापीऊशनेऽन्निषचोगणवैः प्रयुक्तं
॥अत्रांतरे सहचरीगणमापहासः कृत्वांव्यपानृपसतीमथ संज्ञयोऽपि॥५४॥अथ देवी धराऽपि चिकित्सानतरंगितांतरंगा मामपृच्छ
त्॥हंजे किमेतत्॥सत्यं कथयेति॥तत्र च व्यतिकरे॥सानुनयं पृष्टयां देव्यां कृतावहित्थास्वालीषु इदानीं किमेषा कथयति वा पेति
रहस्यभंगभिया दूनायां भर्तृदारिकायां सजिह्वायंत्रणं माभणज्ञापितास्य स्मरणेऽतिसूचयंत्यां मदनकलिकायां कथय कथ

याश्चलंबितमिति।उत्सर्पितपूर्वकायेजल्पतिजरद्दात्रीवर्गे। इमेवमयदं॥ देवि त्वस्तने॥ अस्माभिः सहेयं भर्तृदारिका पुष्पापचयाय
३७ गतासखु उद्यानवाटिकां॥ तत्रश्चित्रजातकुतूहलेनोत्तरलिता॥ कस्मिंश्चित्किरातकुलभूषणेभूभृति संवृद्धानुरागासीत्॥ अका
लेयमित्यकृतार्थेयावद्भुवनमायातितावदस्याइयंदशा॥ तदानीं॥ देहोमध्यसमवृत्तिः स्मितरुचिं धत्ते थना सा मणिः कैश्यस्यानुक
रोत्यमेयचरितान्स्याश्चिधत्तेगुणान्॥ निःश्वासश्चविजृंभते प्रतिकलं बाष्पोयथायोवनं संतापस्तकल्पयत्यपारविभवं लावण्यवारां
निधिं॥५५॥ देवि प्रथमं तावदस्याः करयुगलं तापमाकलय॥ यस्मिंस्तामरसभ्रमेण मिलितैर्भृंगैः पतंगायितं संस्पर्शैर्मणिबंध
कीरनिकरैःसंपातिपत्म्यायितं॥ केलीपुत्रिकयापिदिव्यसमयश्रीरामकांतायितं लेपार्थकलितैश्चचंदनरसैरात्मोदधूपायितं॥५६॥
किंचैनं स्मारंज्वरं कलय लोकविलक्षणं योयं पूर्णचंद्रोदयाभियोगेन वर्द्धते॥ जैवातृकदर्शनादपि जृंभते॥ सेयं भर्तृदारिकास्तोकेन
यामुनापिदूनेवभाति॥ कस्यपश्चिदृग्दोषेणापि भवितव्यं॥ यश्चास्मन्मंत्राविषयः॥ अपिच॥ किमेनदिति विचिन्त्य प्रष्टव्यं॥ यस्मामव ३७
स्थायां वर्तते भर्तृदारिका सा किं देव्या न ज्ञायते॥ देव्येतदेव जानामि॥ इतःपरं देवीप्रमाणमिति॥ ततश्चसा सूक्ष्मसाम हा देवीक्षण

मित्रध्यानाद्दीर्घमुष्णं च निःश्वस्य ॥ किमप्यनुक्त्वा प्रययौ ॥ महाराजोऽपि देवीद्वारा कलितवृत्तान्तैकदेशो मां वास्कइत एहि शृंगारमंज
रीत्याहूय ॥ आज्ञापयामास ॥ गच्छ तपोवनं ॥ यत्र भगवानुशना ॥ ऋषिप्रमेय मंत्रपूतजलमाहर येन तापशांतिर्भवेद्दुःसाध्या इति
तत्साहं अंतर्नियमितस्मिता किं भवति मंत्रजलेन विद्याबलेन वा ॥ मुग्धे यमामायास्यति देवः ॥ भर्तृदारिका मित्रमदनः ॥ देवापि
भ्रांत इव लक्ष्यते ॥ इति स्वगतमालोच्य ॥ प्रकाशं देवस्याज्ञाप्रमाणमित्युक्त्वा ॥ अनुष्ठितराजादेशा प्रतिनिवृतास्मि ॥ यद्यस्य उ
र्कं वक्तव्यं ॥ यदीषदपि परिचयः स्वरज्ञानांतरं सहते ॥ सर्वेमराजकचित्रमेतत् ॥ स्वांतह्रि नस्ति मदनो मानो भगाय
कल्पते ॥ सोऽपि स्नेहसख्येऽत्र नेहेतू रागस्य विषमा गतिः ॥ ५७ ॥ अस्त्वेतत् स स कृती केति न जाने ॥ यस्य ॥ तादृग्जगज्जय्यनं
गमदनवैजयंत्याः शृंगाररससारसर्वस्वमंजूषायाः हृदयाकर्षणमिति ॥ अस्त्वेतदप्यनु मन्यस्व यथाभिमतगमना
य ॥ वेलाभूयसी जाता किं त्वेतदपि ज्ञातुमिच्छामि ॥ कोऽभवानिति ॥ विस्तरतस्तत्कथयेत्याभाष्य जोषमासीत् ॥ मराल
कोऽपि ॥ सखि श्रुणु मदीयवृत्तांतमिति यावद्वक्तुमिच्छति तावद्देवश्रीनिवासोऽपि ॥ नो नीता रतिमंदिरं मणिमयं नो मंच

मारोपितानोदष्टोधरपल्लवः कुचतटीस्पृष्टा नवापाणिना॥ नक्तोऽपिकृतानयामृदुगिरासंभाषिताकथं लंदृष्टान्यूतय
३८ नैकरोतिविमर्शं चेतः कथं कुर्महे॥५८॥ भूयः कातरतामवापहृदयं चस्त्वंतरं नेक्षते दृष्टिः कंपमुपैतिगात्रमयते धैर्यं
निरालंबतां॥ रागाग्निर्मलयानिलैरुपचितः स्मेरो नादृशां प्रापयत्यत्रानंगकदंबकोहृदिगतः साक्षीनचाव्योजनः
॥५९॥ इतिवदन्नेवयदृच्छया तत्स्थानमगमत्॥ यत्र शृंगारमंजरी मरालकश्च॥ आगत्य च तां दृष्ट्वा दृष्टपूर्वतनसं
जातप्रत्यभिज्ञस्तयापि सरभसमुत्थाय सम्यग्मौलिदेशप्रसारितचेलांचलया कथमत्र देवोपीति सस्मेरमुखमंजलिं
बध्वा॥ यः शूरान्वयसंभवः करणातं च कंचयस्य प्रजालोके नाभिभवत्यमेति सच मे श्रीवत्सलक्ष्मापतिः॥ कां
तस्तत्रभवान्भवत्विति यया तप्तं तपोभिः पुरा साचेमंगलदेवता भवतु ते कामाय सोमानना॥६०॥ इत्याशिषा सवि
नयमभिनंदितोऽदेदर्शनिश्चितवांश्च॥ अहो अपूर्वेयमाशिषां परिपाटी॥ यदस्मिंल्लोके तत्रभवानिति शब्दश्रवणेन किमप्या ३८
नंदमेदुरितमिव चेतः प्रायः प्रकृतोपकल्पकालया पोष्यमभवेत्॥ अथ वाभ्रांतेरेष विलासः॥ यदत्र यदृच्छया प्रयु

केषु शद्वेषु स्यात् तु कूजार्थग्रहणं किमाश्चर्यमेतत् ॥ जगदेव तन्मयं पश्यतः ॥ अथवा तर्कागोचरारवलुप्यते भृंगी
॥ अद्य नाम युते गते सकलजनीरक्षा च तेन कलोररवेन तद्दुरे शङ्काग्रमभवद्वर्गं कथं ते न हि ॥ अरवेतन्न दत्तानन्नसे हृत
वा नाजीतदप्यरक्तवा न दूर्तां त्रपते वद त्रहि कथं वल्मीकजन्मा कविः ॥ ६१॥ किंच ॥ भिन्नं मेलयति प्रसादगलितं ग्रंथा
न्नि नीतं पुनः प्रत्यावर्त्तयति क्रमेण शिथिलं नर्यं तनोति क्षणात् ॥ दूरस्थं निकटीकरोति सकघटं चानीय पाणौ ददात्याप्र
न्नं प्रकटीकरोति पुरतो दैवं प्रसन्नं यदि ॥ ६२॥ इति विचिंत्य च ॥ अपि सखि दृष्ट्वा दृष्टासि ॥ किं कुशलं सस्सखीकदंबा-
यायुष्मद्भर्तृदारिकायाः ॥ इत्यानंदवाष्पस्थाने विरहसंतापजनिताश्रूणि कल्पयन् हरितांशुकांचलेन प्रमृज्य ॥ शोणा
रविंदद्रोहदक्षं नेत्रयुगलं सस्पृहं तामभाषत ॥ सापि लज्जामंथरतारं विलोक्य ॥ कुशलमस्याहतभर्तृदारिकायाय स्या
भवादृशाश्रितोन्मथनहेतुः ॥ किंचार्यविदितवेद्यः कुलः ॥ देवस्य प्रियसहचरो मरालकइत्यभिधाय ॥ कृतनतकालोचि
ता लापेन तेन चाभिमतप्रयाणागृहीतपारितोषिकां ॥ अयमयं देवप्रयाणप्राणमांजलिरिति ॥ पारेयरवपरिवृत्य प

श्यंती शनैर्जगाम ॥ श्रीनिवासोपि मरालकवचनहृदीकृतधृतिः फणींद्राचलमागत्य बकुलमालां नारायणपुरं प्रेषयितु
२९ मिच्छन् ॥ मधुरवचनरीतिमंजूसत्सन्निधानां कथमपि निजकार्यस्यानुकूलां विधाय ॥ कस्मिंश्चिद्विविधनारीवेकदेशः प्रसा
द्य प्रभुरपि बकुलां तां श्रीनिवासो ननंद ॥ ६२ ॥ इति श्रीश्रीनिवासविलासे तृतीयउच्छ्वासपर्याप्तः ॥ ३ ॥ अथ परेद्युः श्री
निवासाज्ञया नारायणपुरं गच्छंती बकुला मध्ये मार्गमनर्गलप्रसरयशासंभगर्वितं ब्रह्मरात्रं नीरीक्ष्य प्रणम्य च यथावृत्तं नि
वेदयामास ॥ महद्वैकृपो धृतविधुरातविदितमेव भवता भवतापहारकः श्रीनिवासो भुजंगाचले निवसतीति ॥ स च रुदा
न्निम्नगया परिवृतो मामभणत् अयि बकुले यमपाविपिनभुवि प्रसृतापम्रसरस्सो नाति दूरे कापि पिकालापा दृशास्य शाच
मनसा या खलु हीनमहीनमपि कलयति वेण्या ॥ ३ ॥ तनुमतर्जचो श्वासयति दृष्ट्या ॥ २ ॥ अगं नागं चलं जंतयति कुचाभ्यां
॥ ३ ॥ गजमशजं चक्रे पयति मदनेन ॥ ५ ॥ रतिमरतिं चतिरयति रूपेण ॥ ५ ॥ किं बहुना ॥ वक्त्रं पुष्करहारि शंबरलसन्नेत्रं वियो २९
गोविषं विंबो ष्ठोमृतसंतरः शार्वं तन्ते कटाक्षांकुराः ॥ क्षीरं वाक्भुवनेत्तरं चंपुरयेयस्याः कुचः सद्रसः प्रेमाज्जीवनमे
रा

वत्यद्धि धकारवीस्वासा धनी स्फज्वला ॥ ३ ॥ सा खलु दर्शनात्प्रभृति चंद्ररेखेव सागरस्य कामपि विकृतीमापादितवती चेत
सः ॥ तदत्र भवती भवती निपतितेश्चरणमिति ॥ अहं तु सदुक्तयुतीयदुचितमार्यभावस्य ॥ तथा हि ॥ देव परिहरे मामनीषां
॥ यत रत्नादशानां पार्थिवानां नोचितः पारंभयप्रकारो मन्मथेन ॥ तोषहेतुर्धरणी न तरुणी ॥ महत्वं दर्पेण न कंदर्पेण ॥
द ॥ अंगीकुरु स्वैर्यं न दैन्यं ॥ संपौर्णीयाः कौशानकूशाः कौपाचिरतना स्त्रीमुखं कथं सनेन सरुपुत्तानीताः ॥ देव्या रक्षीराक्ष वि
सैसंविधी मंगीच कार ॥ भगवान् गोविंदः ॥ विनाचंद्रं कौ वा कुधर्न दनो जातः ॥ मधुपाः कुसुमेषु संक्रामंतु ति ॥ मदना
सक्तास्तमो विशंतीतित्वयाप्युक्तं किं तन्मृषा ॥ मारयहतो निःश्रीएव ॥ अपि चैरमपि श्रृणु ॥ या भवतो कासा प्रायेण विय
द्भूयावस्कता भवेत् ॥ जानामि तां ॥ यस्यामधमकुलस्करवप्रभचतुराकुतलाली ॥ भुजंगस्पृहणीया वेणी ॥ दोषाकततु
कारिमुखं ॥ परपुरुषस्तब्रस्वचारी ध्वनिः ॥ पल्लवे कासिका योग्योऽधरः ॥ द्विजिह्वसहचारिणीसे मलता ॥ मातंगानुकू
लंगमनं ॥ सखेयं वंशशुद्धो भवान् कथं तस्यां रक्तः ॥ अरक्तया तस्याप्रणयः ॥ विरुद्धचर्ययोः कथं परिणामरमणीयता ॥

॥ तदपि शृणु संक्षेपतः॥ त्वा दिशो रंजयंती च पुनररंजयन्॥ त्वादृशा रंकुं कुलद्वेषिणी त्वं पुनररकुं कुलद्वेषी॥ सा पु
४० नरलंकाराधिसुंदरी॥ त्वं तु लंकारातिसुंदरः॥ इति॥ अतः परं यथारुचि संमाचरेति॥ सोऽपि श्रुत्वा मद्वचनः ईषद्ध
सन्॥ देवि शद्बसामर्थ्यात्तु गुणान्दोषी कर्तुं दोषान्गुणी कर्तुं समर्थासि॥ अलोकसामान्या तव शक्तिः॥ किमस्य घट
श्लेषवादरसज्ञानां॥ प्रसीदतु वत्से मयि निर्व्याजप्रेममांसलनवनीतकोमलं ते चेतः॥ कश्चित्पुरुषः स्वशत्रुमपि
विवाहशोभया योजयन्महतीं कीर्तिं प्राप्नोति॥ अतो मां कृतार्थं विधाय परां समाख्यामवाप्नुहीति॥ सांजलिबं
धमभणत्॥ महर्षे किं करोमि किं करीत्विदाज्ञा प्रमाणमित्यवतीर्य पवनाशनाचलात्प्राप्य कपिलेश्वरं॥ गुणवद्गुणी
ष्वहीनो मार्गणवन्मार्गणोऽपि लक्ष्मीवान्॥ धर्मो धर्मवदञ्चलो यस्य स पायात्पुराराति:॥२॥ इत्यार्ययोक्त्वसन्महाश्लेष
यागेऽर्यया परयानंदयंती तमुं नायकमिह प्रसाधि॥ बादरायणे इदमपरमभिहितं देवेन॥ बकुलेयघत्रकन्यासंबं ४०
धिनामनुयोगः प्रसरेत्तदा किं कथयसि॥ अद्याप्यकृतविवाहरति॥ कालातिक्रांतिदोषसूचनं॥ जातविवाहोयमि

तिसपत्नीस्थितिज्ञापनं॥ तस्यामउद्भ्रसंतानरत्यनतिपुंस्त्वव्यंजनं॥ द्वितीयो वर इति अमार्गस्योद्बोधनं॥ भार्या
स्याविप्रकृष्टावर्तत इति गृहच्छिद्रावेदनत्वाघवं॥ सा दुश्चरित्रेति अलीकवाद महापातकं॥ नैकयातुष्यतीत्यव्यवस्थ
त्वद्योतनं॥ रूपोन्मादित इति वनितापूर्वकानुरागाभावकथनं॥ तयाप्रलोभितोयमिति कुमारीजनविरुद्धशंकाबीजोद्घा
टनं॥ अभिनववयाः इति प्राचीयस्यानिष्कारणपरोपतापदक्षेण नारदेनाभिहिते रहस्यं पुराणपुरुष इति॥ अथ चतुरासि व
तुं किमपि बावद॥ कथमपि याकुरु॥ अप्रभुरस्मि युक्तायुक्तपरिज्ञाने इति॥ एवं मय्येवार्पितभरे देवे मया धृष्टकंठं शक्य
मित्येवमुक्त्वा विरराम॥ संवृतवचनायां तस्यां शुकोपि स्मारितश्रीनिवासः पुलकांकिततनुः शनैस्तां बभाषे॥ देवि वकुले
कुशलासि वक्तुं॥ वदत्यतो कार्यभावयादेव स्वचित्ताराधनं कृतं॥ अनुसरणीयाः खलु निरर्गलप्रचाराः प्रभवः॥ अन्त्येतत्तावुभा
वपि दृष्टपूर्वौ तयोर्योग्य एव संयोगः॥ यतः॥ स्पाश्यामास हि कृष्णः॥ सा पद्मिनी स तु वसंतमासश्च॥ सा कांता लका॥ स तु राजरा
जश्च॥ सा रूपेण हरिणी स तु पंचास्या हरिणश्च॥ इति॥ तथापि सौभद्रा कातरितिदोलाकर्म करोतीति चेतः॥ अथवा आः कि

मस्याथप्यागमनत्राकाभूपानां ॥ रामो जनकसुतायामनुरक्तः ॥ विचित्रवीर्यस्त्वंबिकामुपयेमे ॥ नदीसुतो वाहिनी
४१ पतिर्वभूव ॥ राजनीतिं विगणय्य तथिक्कारस्य मयौ लोचने ॥ इलायामनुरक्तोभूद्दिव्यपुत्रः पुरूरवाः ॥३॥ इति ॥ अ
थ वामहस्तकदोषारोपेणमेव दोषः ॥ यथा कथंचित्स्वांगेन कृतोपयमसहायेन भवितव्यमित्यार्यवादः ॥ लोके हि स्वशत्रु
मप्युपयमनीयामहाराजसंपदमनुभवंति ॥ तिष्ठत्वेतद्वित्साधयसाधनीयं ॥ अहमपि यथाशक्ति श्रीनिवासस्यकायैक
देशसाधको भवामीति ॥ बकुलापि विश्रुततद्वचना निर्गत्य स्वलदाश्रमात् ॥ चित्रस्मृतिपथं प्राप्ते यस्मिंश्चिष्कटकामहीं ॥
तं श्रीनिवाससंस्मृत्यय यच्छुकोभूत्सकंटकः ॥५॥ इति सानंदं चिंतयंती किंचित्पंथानमतीत्य ॥ राजपुत्र्याः शरीरतापाप
नोदाय द्विजजनक्रियमाणरुद्राभिषेकस्कंधपर्णमुखरीतीरगमगस्त्येश्वरमासाद्य ॥ सा वै पीनपयोधरा संचपुनः श्रीनी
लकंठो भवत्स्वर्णचंप्रकटीचकार सनचसा ऽपर्णाभिधानं गता ॥ तौ जातौ कलधौतकांतिरुचिरा वा चंद्रमाला र्यकंतद्दं ४१
पत्स्यमहोजपत्स्यनुकलंश्री पार्वतीशर्वयोः ॥५॥ इति स्तुत्वात द्विजपरिचर्यापरैः राजदासीजनैः समं तस्यराभि

कस्तीवभूव॥इतः श्रीनिवासस्तत्र चपलस्वभावो मरालकमाह॥वयस्य बकुलालावद्भूतापरं कार्यं साधयानवानवा॥प्रायो
मुग्धांगनानां चित्तं राजप्रसादवच्चपलं॥तत्र मर्दास्त भूयिष्ठे किरातवन इव मृगो भीतभीतः प्रसरति मदनस्तत्र किं करणीय
मिति॥सोप्याह देव मैवं॥यतः॥प्रायशो लोके वनितानां स्पृहारूढा नं सौंदर्यमैश्वर्यं च विद्या च॥तत्रोदाहरणतारद्वयं कल्पय
तु देवः॥तत्रैकातारा॥श्रृंगारदीक्षितत्वं राजत्वं कलानिधित्वं च चंद्रे दृष्ट्वा स्पृहयां बभूव॥द्वितीया तु॥सुग्रीवं गजादिस्कंधक
लालापेन तोषयंतं कपिराजमकामयत्॥देवेंद्रं तावत्स्वैरिणी वृतं॥कावा कुलकन्याएकत्र प्रकटितानुरागा भूत्वा॥परत्र सका
मा न सा भवेत्॥अयि रुक्मिणीजाने किमत्र शंकया॥तस्माद्गुणामि॥वसंत श्रीर्नियतिश्च मेलयति द्व्या॥सोप्यचिरादेव महो
त्सवो विश्वं विस्मापयतीति॥अथ देवोप्यचिंतयत्॥लोके पुरुषः केवलं सरलो न स्यात्॥सरलस्त्वो भकुचभारः पीड्यते॥
नयनवक्रपटोल्लसितो मान्यो भवति॥वक्र एव गुरुरिति सहस्रशः सत्यं॥भगवान्नारायणोपि महामायाफक्क एव पुरुषोत्तमो
जातः॥अतः कपट एव सर्वार्थसाधकः॥इति विचिंत्य॥भारतसमरभूमिरिव गुल्मोद्भासिनी॥वर्षासरिदिव मध्यदेशो

ल्लसत्योता॥विंध्याटवीयचैत्रलतावती॥शंभुमूर्तिरिव कपर्दकमालालंकृताप्रावृड्लक्ष्मीरिवघनालंबिपयोधरा॥धर्म
४२ देवताभूत्वानागराणांपुरंप्रविश्यनिःशेषोरविलासंददर्श॥तत्रकश्चिद्विलासीकांचनस्त्रियंवक्ति॥नीलांबरासिवामोरुमु
सलंचकरेतव॥योग्यातवास्तुरामाख्यातनुयाईभजाधनेति॥अपरःकस्याश्चनवृत्तांतंसरंख्यायप्रख्याह॥ज्यायस्त्री
लुलिताशिवस्यमलिनंचक्रंनखांकोल्लसत्कोदंडंमुकुलीवभूवचशरस्याद्यावतारक्रमः॥आयस्तास्कमयाटिकाशिथिलि
तप्रायांशुकःस्पंदनःप्रायेणाक्रमुखीसखेरिपुरणश्रांतेवसंलक्ष्यते॥७॥इति॥कश्चिदपरांमुग्धावस्थामारभ्यक्रमेणरू
ढयौवनाकामुकींवर्णयति॥यत्पुष्पेषुशिलीमुखावृतिरभूत्सौरभ्यमासीत्ततःपुष्पंचोत्कलिकाचपल्लवकुलेसारक्तातांतेन
तः॥पश्चात्सद्दृष्टपालिवेषनविधिःपश्चाद्दृसापेक्षितीयस्यास्तद्दूरत्वाल्लताविजयतेसाकापिनेत्रोत्सवः॥८॥इतिकामि
दृनितायैरेवाक्षरैरवपुरुषःसंलापयतितैरेवाक्षरैःप्रतिवक्ति॥वीरापितेनैपुण्यंदर्शय॥मेरवत्वमभियोगेनरुखाय॥रा ४२
माधिकस्वभावात्ददर्पगमश्रीरसि॥सरलतानेलोकोन्तरा॥सन्मालालंगुणनायकगुणोल्लसितसंपत्॥अधरकतस्तकल

बंधुजीवरुचिरसि॥ सर्वदोरुसंपदा मनोहरसि॥ रुच्यतिरेकान्मामधः करोषि॥ त्वइत्थाविस्मयान्वितं मे चेतइति॥ कश्चित्
स्त्रियंस्तवन्निंदति॥ मुग्धेसप्रियासि॥ अतनुकलहप्रिये अतिरमणीयसि स्फुतमानेकि बहुभाषणेरिति॥ काचिद्दृष्टं स्तव
न्निवधिकुर्वतीस्वसुतांशिक्षयति॥ जरद्वेश्या॥ मुग्धेमनोजातविकारमेतस्मिन्माकुरु॥ वृथैवानेन सहजल्पं त्यारत्तय
स्नेहक्षयएवफलंस्यात्॥ यथानिशांतंनयातितथाकुरु॥ अचिरादेववस्तुमानागच्छतियश्चहितत्तरः पद्मिनीनां॥ ततःपर
मेतेनकिंतेप्रयोजनमिति॥ काचिद्वेश्यागृहकृत्यव्याजाद्दुहितरंशिक्षयति॥ अनर्घमणिताभिज्ञेकंठस्थंस्नेहपूर्णनायकं
सत्कुरुनबंधनंप्राप्नोतिस्फुरभिश्चतन्त्रपश्यतसिकुतःदुर्बलेप्रवृत्तिंजानीहि॥ कगतागुणान्नपात्रेतेप्रत्ययइति॥ का
चित्सखीचतुरंगलीलाविवेदनव्याजेनजारंबोधयति॥ प्रियमखननुअस्याःकुंजरंगृहाण॥ स्मरनयाजितकृतचातुर्यम
स्याः॥ पश्यपश्यसेनामेनांत्वन्निकटगां॥ प्रकटीकुरुरथ॥ पात्रंमात्यज॥ याजयबंधेइति॥ एवमात्रांतरे॥ लसमानस
मयत्रागलितघनयांतम्निकररमणीया॥ शारदःप्रभातवेलायभारलीलांस्पृटिखेव॥३॥ अथोदितेसूर्येतत्रतत्रकाल

त्रयवृत्तांतं कथयंती राजभवनवीथिकां प्रविश्य ॥ तत्रापि जनकदंबवेष्टिता धर्मदेवता तत्सद्वृत्तं कथयति स्म ॥ तथाहि ॥ का
५२ मपि वेश्यां प्रति ॥ पूर्वेद्युः कर्दितोपांत एव कश्चिद्दुर्तंगो दृष्टः ॥ सत्वयामंत्रबलाद्बंधे विनिवेशितः ॥ कंचौरं प्रति ॥ अयेलुपारत्रौ
रामाराधनं कृतं ॥ इदानीं बहुधान्यागमश्चिंतयाम्लानमुखोसि ॥ पुंडरीकनयनाराधनं कुरु फलवाप्स्यति ते मनोरथ इति ॥
कंचन वणिजं प्रति ॥ रात्रौ त्वयानीवी मोचिता ॥ इदानीमपि मधुराधरागमनं चिंतयसि ॥ सत्यावृत्तवृत्या ते कार्यसिद्धिः ॥ दुर्गतं
प्रती ॥ ग्रीष्मे व स्वल्पसं पश्यसि ॥ अपरं प्रति ॥ सूर्येस्तमिते श्यामालाभो भवति ॥ अन्यं प्रति ॥ मध्याह्ने मित्रं स्वपक्षमवगच्छसि ॥
अन्यं प्र० ॥ पौर्णमास्यां प्रथमराजानं द्रक्ष्यसि ॥ विटं प्रति ॥ कावेरी ते दुःखमपनुदति ॥ अन्यं अन्यप्र० ॥ इद्धं प्रार्थयसं तानला
भो भवति ॥ मंदपुत्रां प्रति ॥ वसंते तवांगजः प्रोठो भवति अन्यं शरदि धात्री दर्शनं भवति ॥ एवं जनमात्रं विश्वासपा
त्रमापादयंती समर्थेयं कालत्रयवृत्तकथन इति स्तूयमाना राजवल्लभयापि धरयाचेटीमुखेनाकारिता राजभवनमा ५३
साद्य ॥ देव्या पृष्टा कुशलं धिता स्वप्नं दत्ते ॥ ततः परं सर्वमपि ब्रवीमीति ॥ तत्रातिचापलेन मध्ये मध्ये भिनयंती श्री वदरी

नारायणमल्लिकार्जुनवेद्यश्रीरंगेशविरूपाक्षवीरभद्रनंजुंडगोकर्णलिंगेतिदेवताः प्रार्थयंतीयष्टिकाचालयंतीरुद
तंत्रिशुंताउयतीअयिराजदास्यः इयंराजांगनायदुद्दिश्यपतितिसाविपत् अंगजातानुबंधिनी॥महिष्याः वृत्तमिदं॥कि
मयेनस्फुरभिवृत्तांतः एषः किंतूलेंतिष्ठथ॥सत्यमसत्यंवेतिमुहुर्मुहुरुत्रासयंती॥अयिराजांगने तातमिदानीमियमनं
गपीडाविस्तरेणवक्तुंनावसरः॥प्रकृतमनुसरामि॥तदाकर्णयभूतवृत्तांतमित्यकथयत्॥अत्रांतरेदेवीसभयं॥अयिधर्म
देवतेकिंमनुष्याःपिशाचवाधेतिभणसिकिंसत्यमसत्यमित्याह॥सोपि॥मुग्धेप्राग्वृत्तमवधारयेतिवदन्निनपिशाचपीडेति
॥इयंकिलवसंतेकस्मिंश्चिद्वनप्रदेशेकंचननिर्जरंनिजरपुंडरीकपुंडरीकगर्वहरनेत्रनेत्रप्रभाजितचंद्रं॥चंद्रकुलाव
तंसंतंसन्मानितंपञ्चासनादिभिः॥अर्जुनवर्णनघोटकेनवसनेनचविराजमानं॥राजमानहारेणचक्रेणभुजेनचशो
भमानं॥शिवमिवसवलयकरं॥कमपिविभिषारचक्रवर्तिनमद्राक्षीत्॥तत्रचाभिनिविष्टेयंकष्टांदशामवापतत्सत्य
मसत्यंवाविचारय॥शृणुराजांगने॥वर्तमानमपि॥याचकजनतैवकामाभिभूता॥चंपककलिकेवालिवर्गेनस्करव

यति॥बोद्धचित्तवृत्तिरिवप्रसूनालोकनमिस्पृहा॥अभूरततिरिवझिल्लीमुखराद्भीता॥शुंभभ्रमरश्रेणीवसर्वदापिकलस्वहृ
८५ म्ना॥पतिव्रतेचपल्लवत्तस्यंनानुमोदते॥कैवर्ततापीवलपतीयं॥अपिभूपकुटुंबिनिभविष्यमपिशृणु॥अद्यश्वोवात
त्खवरयूनोधात्रीवकुलमालाभिधानाआगच्छतिकन्यार्थिनीसायदिकृतकृत्यातर्हियंसलकविवर्जीयति॥द्रव्यत्ववस्व
भावमवलंबते॥पार्वतीवकुलाचलख्यातिंप्रथयति॥कमलपंक्तिरिवश्रीनिवासयोग्याभूत्वा॥वीरततिरिवातनुजन्या
नर्दननोति॥दैवकथितंकथननीयं॥इतःपरंस्थातुंनशक्यतेदुष्टामेसवलीशिशुरपिनाभिजातः॥तदनुमन्यस्व
यामियथागतमिति॥एवमुक्त्वागतेकुहनाधर्मदेवतास्वरूपेश्रीनिवासे॥धरादेव्यामपिसत्यमाहधर्मदेवतापुष्पस
मयःपुष्पसमयश्चनर्तयतिवालोजनमानसं॥कमलाश्रुवाःकमलाश्रुगश्चदुःसहएव॥भवतुसाकावकुलाभिधा
नापश्यामितावत्॥यदितदागमनमनलीकंतर्हिधर्मदेवतोक्तमनुष्ठेयमेवेतिनिश्चितवत्यां॥परेद्युःप्रातरेवयथोक्त ८५
परिवारासागतेववकुलमाला॥तदनुराज्ञीसेयमेवेतिविज्ञायसानंदंपीनपयोधराभ्यांतदुरस्खलमाघट्टयंतीकु

चोभ्रत्यालिंगनापयीत्स्वहस्तनिर्मितगिरिकृतकोपाविष्करणाधातरिमहाराजयोग्योपचारैः सत्कृत्य भवनंप्रापय्याग
मनकारणमपृच्छत्॥ साप्यवदत्॥ देवि धरेश्वर शृणु मदागमनकारणं॥ यस्य वाणी कल्पा सत्यपूता च॥ कामस्तनयः सत्य
श्च॥ सुग्रीवो देहोश्वेश्च॥ अलक्ष्मपहस्तितपदश्रीः नखश्रेणीच॥ भूरिशोभावहं चरूपं सौंदर्यं च॥ सारसानुकारि नेत्रयुग
लं वल्कं च॥ यस्मिन् राजनि दूरकार्यासक्तवृत्तस्य भणे वेधः सदानस्य गजस्य मदः॥ सुवर्चस्य वेणोः कंटकाक्रांतिः॥ सूर
जातस्य दाने मंदता॥ स्निग्धानां च वनितानां मानहानिः सुवचसां शुकानां पंजरबंधः॥ सरसानां नदीनां अधोगतिः॥ तस्य
भगवतः श्रीलिपिवासस्त्वं दासीकन्यार्थिनी प्राप्तास्मीति॥ तदुक्तमाकर्ण्य संतोषनिर्भरा देवी राजानं शुद्धं तमाहूय शुद्धंतराधर्मदेव
तागदितं वृत्तकुलागमनं रूपद्विस्मापितमणिपुत्र्याः पुत्र्याः दशां च निवेद्य विगलितवेद्यांतरं चक्रे॥ सोपि स्फुरद्गुरुमाहूय सभां विधि
तदत्तं चकार॥ स चाह वाचस्पतिः॥ वर्षावासरेणेव सर्वतोमुखपूर्णेन हर्षेण॥ रे रे राजकुलकमलिनीराजहंस॥ कमलाकमला
यस्य ताक्ष्र्यस्ताक्ष्र्योधरापते॥ नंदिनी नंदिनी यस्य स ते राजन्वरो वरः॥१०॥ यत्कीर्तिहंसितं मरवे कुचतटे मुक्तासरश्चादनं फाले

सन्निलंकृसिताब्जकलिकोत्तंसस्तथा कर्णयोः॥हस्ते हीरककंकणं सुधवलं वस्त्रं नितंबस्थले पादे राजतहंसको जयति सारिकु
४५ पंकजाक्षी तते॥३॥ किंच॥मत्स्य इव सदा वनविहाररसिकः॥कूर्म इवोद्धृतचंद्रगोत्रः॥वराह इव क्षमान्वितः॥पुराणसिंह इ
व नृसिंहः॥वामन इवोग्रमार्गणः॥भार्गव इव सहस्रबाहुगर्वहरः॥राम इव अचलोद्भूतिरुचिरः॥कृष्ण इव भद्रानंददायकः॥
बुद्ध इव नयज्ञप्रीतः॥कल्कीव सकृतोद्भवनिदानं॥अथ यालमुपमित्यास एवमत्स्यादिरित्यार्यवादः॥भद्राख्यः प्रमदोज्ज्वलश्च
सन्ततं पो राजहंसश्रिया भ्राजिष्णुः सुकुमारतां समगमद्यो वै धनोल्लासितः॥स श्रीमान्जयति प्रकाममसकरश्रेणीकृपाणी हरि
र्गंगायद्गजगंडवत्॥गगनवत् गांगेयवद्क्रेयवत्॥१२॥इति यावद् दतिताचलकश्चिद् द्राग मंत्री बहुश्रुतो नाम कथयां बभूव॥भो
देवानेनस्करपुरोधसोक्तमाकर्णयतामयापि किंचित्स्मृतमिदानीं जानाम्यहं तं॥स हि कृतदशावतार इति सत्यमेव॥तथापि
त्कगुणान्न पश्यामि॥तथा ह्येनं॥मत्स्यावतारे नीरसंचरणचंचलमाहुः॥कौर्मेप्यवतारे धृतमंदरागं॥वराहे तु कुप्रीतियु ४५
क्तं॥नरसिंहे तु कया धुतनयोनंदित इति॥वामनेपि बलिश्वरोधेन सचनंगत इति॥भार्गवावतारेप्यर्जुनद्रोहीति॥रामा

वतारे शरभंगमयापेति॥ बौद्धावतारे ऽहिंसानंदं बभार॥ कल्क्यवतारे कलिसत्कृतमध्यवतरि॥ अपि च॥ राम एव कृष्ण इ
त्याचार्योचक्तिलदृपिविचार्य॥ कृष्णो हत्यानंददः॥ रामस्य हत्यानंददः कथं जातः॥ देव शृणु कृष्णावतारकथामपि॥ पा
लितार्जुनोऽपि भग्नार्जुनः श्यासीत्॥ किंच॥ बाललीलाचरित्रमस्ति तद्वाचामगोचरीऽस्मात्कमितः परं देवः प्रमाणं॥ इति॥
उक्त्वा तूष्णींस्थिते तस्मिन्ते राजमंत्रिणि संदेहदोलारूढे भूपे पुनर्देवाचार्ये कुपित इव॥ हंहो राजवल्लभ बहुश्रुतप्रगल्भ
भोऽसि शिष्टश्रावणप्रायां॥ देवेऽप्यस्पृष्टदोषगंधे ज्ञातसामर्थ्यात्किंदुष्पमासे पयसि॥ शृणु रे॥ गंगापादसरोजपुष्परसतिव्यालाधि
पत्तल्पतिद्वैत्योर्वचदुंबतिद्विरसैनहेषीरथप्पंउजः॥ कालः शास्त्रतिशासनस्यनुदिर्नसावेदवाणीगृहस्याब्धिर्यस्परमावि
लासरसिके तस्मिन्नकिंसद्गुणाः॥ १२॥ किंच॥ सत्यव्रतदयाशालीनकिंमत्स्यः॥ पृष्ठीकृतमंदरागः कूर्मः॥ वसुमत्य
लंकृतो वराह॥ हिरण्यदानदक्षो नृसिंहः॥ विक्रमप्रसिद्धो वामनः सहस्रकरविरोधिप्रतापप्रसरो भार्गवः॥ धर्मदीक्षा
गुरू रामसख्यान्वितकृष्णः॥ सर्वज्ञो बुद्धः॥ सत्कृतजनकः कल्की॥ अपि च॥ यस्मिन्रक्षति क्षितिं॥ आपणे आपणे रोहि

एयः॥मंडले२राजानः॥पंजरे२शुकाः वने२इंद्रद्रुमाः॥वीथीषु२निर्जराः॥स्फुरते२इंद्राण्य॥विले२चक्रिणः॥अरण्ये२स्था
४६ णवः॥तस्मिन्निषधराजनिग्रहोपायविदि दाशरथ्यभिन्ने श्रीकृष्णदेवे राय रत्नमपिनविस्मयाय॥अन्यथा शबरीकथं तुष्येत्॥
ति श्रुत्वेतदस्मद्वचनं॥पुराणाचार्यः शुकः प्रष्टुः॥इति वदति स्मृतिमात्रकृतसंनिधानः यथाविधिपूजितः कथयामास स शुक
योगी॥राजन्नवहितो भव॥पुरा खलु भेतायांश्च तएवस्पात्स्य घमानेषु पुण्यप्रबंधेषु कश्चिद्रामो नाम राजा दशरथिरयोध्या
धीश इति॥यस्मिन्राजनि॥स्फुताराति तुल्यरूपश्चंद्र इव॥ब्राह्मणगणो जैवातृकश्च॥स्फुमहितो वसंत इव क्षत्रियचयश्च
शोकांकितश्च॥यस्य च राष्ट्रे गिरिविभ्रमाः गजा इव द्विजाः॥समदा द्विजा इव गजाश्च॥स्फुप्रतीकस्य हरिण्याः करिण्य इव
तरुण्यः सार्वभौमयोग्यास्तरुण्य इव करिण्यः॥कलमहिता वाणीव केदारश्रेणी बहुधान्यरूपा केदारश्रेणीव वाणी॥रा
क्षसविभवानंदश्च वर्णं हि समास्फुचक्रवर्तित्वं॥राजन्कुलकान्निचये रक्षति यस्मिन्चस्कंधरां राज्ञि॥१४॥स हि स त्स्फुरागशे ४६
मंशैव शरासं करं च सीतायाः॥चित्रं२फगतेपे राजकर्दर्व्वचपीउितंचक्रे॥१५॥अनुभूतचापभंगः पूर्वपिश्चाच्च दशशरमं

गः॥ बहुगुणभंगः सततंचित्रं२तथापी वीरोस्मो॥१६॥ सजयति कश्चन धन्वी वाल्लिस्वमार्गगमननिःश्रेणिः॥ छिन्नस्कसंधितता
रातारंकश्रीः कृपाचेल्ली॥१७॥ आश्रुराजानुकूलाशनसा स्कृतलंकापुरीतदाशोयः॥ सीतादर्शनकुतुकी सोव्यात्काकुत्स्थ
एयपरिणामः॥१८॥ विरहाग्निः शांतिमगात्प्रविशति वह्नौ विदेहकुलदले॥ नहि चित्रं सीतायामुत्तमेनोह्मं प्रशांतिमेतिकिल॥१९॥
ततस्तु चित्रभानुप्रवेशर्पि निर्गमपूता सीता प्राप्तराज्यं राममवादीत्॥ आर्यपुत्र मायासीतेयमायास्ति तादुरात्मना रावणहृतके
न तदियं भार्यापदे स्थापनीयेति॥ रामस्तत दाकर्ण्य॥ प्रियेजानकि॥ एकपत्नीव्रतधरोहमिदानीं कृतकस्माय तारः तारेशमुखी
मेर्नामेनांगजातामिवज्ञावः भूभृस्कुतामंगीकरोमी त्यभाणीत्॥ राजन्नसैव पद्मावतीस एव श्रीनिवासस्तयोरुचित एव संबंधः
॥ कोत्र संदेहः॥ किंचिलंघेन लिख्यतांलग्नपत्रिकेति॥ अथाकाशभूपतिस्तत्स लग्नपत्रं भगवंतं भागवतप्रसस्थ्यंश्रीशुकं वकुलया
सह प्रेषयितुमिच्छन्कुमारीप्रासादस्थितां वकुलां॥ भटीगजः करोनीतिरपिवेंकटभूपते॥ वत्सेसदानरसमाभातितपद्मवर्गवत्
॥२०॥ कांताभालकरां क्षास्मिरूपवद्राजनेसरों॥ रोहितांकोन्नसत्क्रीडे घानं शेषांचलप्रभोः॥२१॥ इति श्रीनिवासगुणवर्णन

प्रचुरं राजपुत्र्यास्सह सल्लपंतीमाहूय फणिराड्राचलं प्रेषयामास ॥ स च शक्रोपि सपक्षस्तद्दृहे च प्राप्य यथाशास्त्रं पूजितः ॥ चंचलश्रीमं
५७ दृष्टः श्रीनिवासतयाहिनः ॥ अक्षरन्क्षतिकन्तोपि तादृगेवेति विस्मयः ॥२२॥ तस्य त्वोरपि तन्वारीमत्ताविंद्धिकप्रभो ॥ स च यत्संयत्कुकु
तलः सा च संयक्तकुंतला ॥२३॥ इति स जयमुद्धरीर्य ॥ प्रतिपाद्य दुहितरं स्वां गंगां भर्त्रे स्त्रवंतीनां ॥ जगृहे तदीयकन्यां लक्ष्मीं कृतमः
कलत्राथरी ॥२४॥ इति बहुश्रुतप्रोक्तश्लोकयर्जं सर्वमपि वृत्तं स्वागमनकारणं च निवेद्य तोषयामास ॥ स्वाने स्थलेतत् ॥ न कस्य श्रु
कवाणी तोषहेतुः ॥ पुनश्च शुकः श्रीनिवासमाह ॥ देव सर्वमपि वृंदारकवृंदभाकारय ॥ अधुनातु ॥ सर्वत्र परिपूर्णवाहिनीस्सम
द्धकमलः उत्प्लवमानहरिकदंबः ॥ स्फुरच्चापः ज्याहितकरः शूरराजतेजोपहारकः ॥ दृप्तसारंगनिकरः महार्णव इव वर्षासम
यः समाजगाम ॥ यश्चाब्जयोनिरिव निरिवसर्वसत्त्वाकरः ॥ संवर्त इव दृष्टानेकरवद्योतप्रतापः ॥ अनुकूलनायक इव सदा बलाका
महितः ॥ भारतरण इव दृप्तसिंधुराजः ॥ द्रुपद इव शिखंडिनंदनः ॥ दुर्जन इव भिन्नसेतुः ॥ तालवनप्रदेश इव मत्तधेनुकः ॥ त्व ५७
मिव संजातकीर्तिः ॥ आनंदयति धार्तराष्ट्रकटाक्ष इव सर्वं ॥ अपि चेदानीमस्त हमानतपः स्थितिविलासाः ॥ पुनश्च वद्दस्पृहाः

॥मित्रस्यरात्रोपिनानुग्राह्याः॥इतिसूचयंताविवपुष्पवंतौनयनगोचरीभवतः॥द्रावयंतइवशुभ्रिचरित्रं॥मदनगुटिकाधनुर्म
ताः॥कुमदकलिकाइवपतंतिकरकाः॥जीवनप्रदेष्वपिचपजाः श्चिरसगतंनवर्धंते॥तिकथयंखरचमेघेषुक्षणंराजंतिसौदामि
न्यः॥किंबहुना॥राधोच्छासनिद्रानेनऋक्षरष्ट्रदर्पहारिणा॥अनेनहंसरिपुणादेवकीनंदनायितं॥२४॥ देवेतःकथयामिजं
कुशोभावहे॥स्कमतःसंदोहस्कंदरे॥त्वयीववर्षावासरेकृतवतिदयाशरदिमहोत्सवमतभवतुदेवइतिउरसाचतदनुम
खास्याश्रभंगतवतिऋषिसार्वभौमेभुकेवकुलाहस्तार्पितंपमायखावसंतमिवसकलंकंदशोभं॥ग्रीष्माभिवशुचि
तारमणीयमितं॥वर्षावासरमिवपयोधरस्तंबंधस्कंदरं॥शरत्समयमिवराजच्चंद्रगुणं॥हेमंतमिवस्पृहणीयमित्र
करं॥शिशिरमिवतपस्थितिज्ञापकं॥मौक्तिकहारकंठालंकरणंविधायकदागच्छेच्छरदितिचिंतयन्॥नवरसकमनी
यशीतशीतस्वभावेलसतिसघनसारोज्जृंभणेवेकदेशः॥कश्चिदिवनृमृगेंद्राचार्यचार्चाविलासेविहरतिसचवर्षावा
सरेश्रीनिवासः॥२५॥ ॥इतिश्रीनिवासविलासेचतुर्थोल्लासः॥४॥ ॥श्रीहरंच॥अथतस्यांवर्षावासरकला

रमण्यां क्षीणरसायां गतायां ॥१॥ दृश्यादृश्यगौरपयोधरां ॥ हंसकुलसन्नीरजपदां ॥ स्फुटपरिकलितनिर्मलरसां ॥ निरवग्रहरा
४८ ज्ञासंपदभिरामां ॥ अपादशुभ्रांकुरमाप्रकयेपलक्ष्यमानक्षात्रमौलां ॥ अतनुबंधजीवानंदकारणं ॥ रंभोरुश्रिपं दधानां ॥ शु
रुक्ताहाररमणीयां ॥ स्फूर्जच्चंद्रशालिनिशाभिरामां ॥ ललितमृणालभुजाभूषितां ॥ शरदसाक्षादिव पश्यावतीर्णां विलोक्य ॥ द्वि
गुणीनरणरणके आविवासे मरालकः पपाठ ॥ वेणीगुंफितकमलश्रेणी संसक्तचंचरीककुला ॥ एणीदृग्गिवानंदद्राणीने
वासकस्यशरदेषा ॥ आमोदितकमलाशयमुत्पविधप्रसादभूयिष्ठं ॥ श्रीकृष्णयोः सखीवत्र्यदतु देवः शरत्समर्णं
॥२॥ इति ॥ अथ तेन प्रथमरसासारंगभिते नश्लोकद्वयेनं चमत्कृतो बलाभीयमान इव मदनेन ॥ प्रयागमिवभारद्वाजसंचा
ररमणीयं ॥ स्वयशः समूहमिव लसच्चंद्रभासं काशसोदर्यवहं ॥ स्कंदमिव अपहृतक्रौंचमर्दं ॥ पर्वतैकदेशमाश्रित्य
॥ मरालकमवादीद्देवः ॥ वयस्य पश्य ॥३॥ चित्रवर्णसमुल्लासः सर्वद्विजकुलाग्रणीः ॥ शुकः कूजति सानंदं निखिल ४८
श्रुतिसौख्यदः ॥४॥ इति ॥ श्रुत्वा मरालकेपि ॥ देवतिष्ठ त्वेतत् शुककूजनं किमिने नारुंतुदेन देवस्य ॥ तच्छुककूजनं

स्मरतु भवान्॥ यत्कंदर्पकालसर्पदष्टस्य देवस्य पतनं राजमंत्रः इति भणति सति॥ साधु भणितं वयस्येनेति श्लाघयन्॥
स्मृतिमात्रकृतसन्निधानौ अनंताभिधानो द्वावपि सपक्षाविद्याहव्यशेषगरुडौ॥ भगवच्छांगिरिकृतप्रेमावासः चतुर्मखः
शिवश्च सर्वामरगणैः सहागच्छेति वक्तव्य इत्याज्ञाप्य पत्रिकां च दत्वा प्रेषयामास॥ ततश्च॥ अभूत्पतंगाधिपतिः सपत्रो न
तद्विचित्रं स यतो गरुत्मान्॥ चित्रं फणींद्रोपि तथेति यद्वा किं दुर्लभं तुष्यति वासुदेवे॥ ५॥ अथ ताभ्यामामंत्रिताः सर्वे सबुधाः
अपि विबुधाः॥ भवेन विभवेन च राजमानाः॥ मानयुक्ता विमानरूढाश्च॥ फणींद्राचलमगमन्दैवाः तदनु तानागतान्
तान्वीक्ष्य॥ देव एते श्वेतानंद कौशिक मित्रांगज शुक्र हरिप्रभृतयः सप्रदाः सयमाः समृगकृत्तिकाश्लेषाः॥ सापाढाः वै
श्रवणतसराः देवाः मुनयश्च समागताः॥ तत्र एते देवाः॥ सकामा अप्यकामाः॥ देवस्त्रियस्सशिवा अप्यशुभ्राः॥ राशयः
सतुला अतुलाः॥ ग्रहाः ससूर्यमंगला अप्यसूर्यमंगलाः॥ किंच॥ एतौ द्विजराजौ गरुडस्कंधांशु॥ महाल्लियतारो वायु
पुरंदरौ॥ नियमितताशौ गुरुसूर्यौ॥ शिखिरथ्यासौ स्कंदवैश्वानरौ॥ आसभवौ मदनचतुर्मखौ॥ अपि चान्ये केचन॥

रा जी
शिवाइव समंगलाः गांगेयभूषिताश्च ॥ अग्नय इव रोहितश्चाः सहेतयश्च ॥ ब्रह्माण इव सत्यासक्ताः सुकुमाराश्च ॥ चीर्वा
४९ ण इति विषयेन प्रदर्शितान्गिरीश्य सहर्षस्तमजीगदत् ॥ सेनापते ॥ यथायोग्यं एतान् अवतारयेति ॥ स तु देवेन पूर्वमेव अ
विनास्ताश्रिताश्चेति वदन्नेव निर्गमिक्षणात्पुनः प्रविश्य व्यजिज्ञपत् ॥ देव मद्गमनात्सर्वमेव स्कभनो वाटिकायां पुरंदरः ॥१
वरुणस्त्वाकाशगंगानिकट एव सानंदः ॥२॥ धनदः पुण्यजनावासयोग्यं गिरिशिखरं समाश्रितः ॥३॥ रंभावने जागरूक
स्तिष्ठति नलकूबरः ॥४॥ भानुः कांचनशैलाभिरामां छायामाश्रित्य क्रीडति ॥५॥ स्कंदस्तु देवसेनां क्षणमपि न मुंचति परे
भ्यः शाकुमानः ॥६॥ चंद्रस्तारोद्यानस्थितमंडपे निवसति ॥७॥ शिवः परितः पर्वतमयं परिपालयन् वर्तते ॥८॥ मरुतश्चैक
टभूपालवैरिमुख्यापिनः ॥९॥ मदनस्तु देवस्य निकट एव धृतशरचापो यामिकव्यापारासक्त इति विदितमेव ॥१०॥ दे
वाभ्यत्किंचिद्विज्ञाप्यमस्ति ॥ इंद्रस्त्वहिहेति वासुकिप्रभृतिः सर्पगणः विभेति ॥११॥ वायुश्चहुयो कोप्येकत्र न तिष्ठति ॥१२ ४९
वृश्चिकराशेः स्थलं न मिलति ॥१३॥ पराशरः कन्याराशिनिकटं यथा न गच्छेत्तथा देवेन पक्तव्यः ॥१४॥ स्कंद वरुणो वाहि

नीपतित्वे प्राप्तकलहौ ।।१५।। अपिचायं वैश्वानरः अंशेनैव वाह्निकोनाम्नोदरं प्रविश्य व्याकुलयति ।।१६।। तदत्र का गतिः इतः
परं देवः प्रमाणमिति ।। देवेपि स्मेरवदने कृतचतुराननालापे न सर्वोपि जनः क्षुधातुरो भवति वद ।। कथय चतुराननं मद्वचसोंइति
आज्ञापयति ।। विष्वक्सेनोक्तः परमेष्ठी कुबेरमवदत् ।। धनाधिपते देवः श्रीनिवास आज्ञापयति तावत् ।। मीनमेषकुंभराशि
योर्वर्त्तते ।।१।। देवानाममृतं स्वामिपुष्करिणीपुरे वस्त्वर्पितं ।।२।। काष्ठार्थं दिग्देवताः संत्येव ।।३।। पयोर्थं मेघा आज्ञापिताः ।।४।। अ
लंकृतयः कल्पितार्पिता एव ।।५।। अन्यदापादनीयं भवति ।। तस्माद्भवानेव द्वारणमिति ।। तथास्त्विति तेनोक्तेऽगृहीत्वा द्रव्यजातं तंतत्त
द्योग्यं जनं तत्तद्व्यापारे नियोजयामास ।। तथाहि ।। कामदाने शंकरं ।। स्वरभिद्व्यसाधने वसंतं ।।२।। आभृंगमनागमन व्यापारे वा
युं ।।३।। चंद्रावरमणियहरणमोक्षव्यापारे स्वर्भानुं ।।४।। वनिताजनसत्कारे मदनं ।।५।। अतनुदीपप्रबोधने चंद्रं ।।६।। आर्याज्ञापा
लने रुद्रं ।।७।। गीतादिश्रवणे वैश्रवणं ।।८।। सर्वव्यापारेषु मंगलं ।।९।। इति ।। सभास्तारेषु मुनिषु देवेषु च नरेषु च ।। चित्रं चित्रं वि
शेषेण यथा सोभूत् समारतः ।।५।। ततश्च ।। अश्वगर्लानमाचरितुं प्रवृत्तस्तत्काल जात लक्ष्मी स्मृतिः ।। अचिंतयद्देवः ।। लोके

सपक्षत्वेन सर्पकोऽपि कासारो भुवनाधारो भवति ॥ खकमलएव चंद्रो दोषाकरोऽपि सर्वज्ञचूडामणिख्यातिं लभते ॥ सम एव सर्वैः
५० श्लाघ्यते ॥ सश्रीकस्त्वपमर्दपुरुषोऽपि चंडीं वशवर्तिनीं कुरुते शिव इति ॥ अत्रांतरे विदितप्रभुक्षापः उस्मरश्मिः सार्थकपवि
त्रमित्रभार्यं ॥ प्राप्य करवीरपुरं ॥ तत्र च ॥ क्षीरपारावारकन्यां ॥ भाषास्मरहयहेषाशेषांबुजलोचनाशिरोभूषा ॥ शेषाहि-
तल्पयोषा सैषामप्यस्तकलितपरितोषा ॥ ५ ॥ इति स्तुत्वा ॥ तयाप्यागमनकारणं किमिति पृष्टः ॥ तां बभाषे ॥ देवि शृणु-
देवः श्रीनिवासः भुजंगराजशैले निवसतीति ज्ञातमेव खलु ॥ स हि शरीरजातपीडया दूयमानमनाः कांचनलतांगी कमलां
कमलपाणिमाश्लिष्य पूर्णकामो भवामीति त्वामाह ॥ तदत्र ॥ शेषाचलं गतया भवत्या भवितव्यं इति ॥ अथ क्षणादेव करवीर
पुरान्निर्गतयोः सूर्याभिधानरमणीययोः ॥ सच्छायाल्हादकयोः ॥ पुष्करोद्भासिकरयोः ॥ गगनमध्यस्थितिश्लाघ्ययोः ॥ शे
षाचलनिकटं प्राप्तयोः ॥ तपनक्षीराब्धिकन्ययोः ॥ प्रथममागते दिनेशे कृततदुचितकार्यः ॥ देव आगता देवीति विज्ञापयति ५०
तस्मिन् आश्लिष्यतमाह ॥ श्रवणे त्रासकृद्घन्मेतारा श्वासनतत्परः ॥ अद्भुतरसाश्लेषः सूर्यजो वा न को भवेत् इति ॥ ६ ॥